कमलशील वज्रच्छेदिकाटिका

(९५)
आचार्यकमलशीलविरचितया

आर्यप्रज्ञापारमिताया वज्रच्छेदिकाया
विस्तृतटीकया सहितम्

नमो मञ्चुश्रिये कुमारभूताय

मङ्गलाचरणम्

कायः प्रसिद्धः परिदृश्यमानो जनेषु सर्वेषु स्फुटं तथापि ।
स्वभावतो वस्तुतया न प्राप्तो निदर्शितः सोऽपि च प्राप्तिहेतुः ।।

फलस्य श्रेष्ठस्य च नित्यभूतपरमस्य चाग्र्यस्य जिनैः समस्तैः ।
अतश्य त्रैयध्विकसर्वबुद्धप्रसूं नमस्याम्यनिशं हृदा तां ।।१।।
(९६)
अल्पीयसाभ्यासबलेन यस्याः, महान्ति पुण्यानि हि सञ्चिनोति ।
उत्खातमूलानि च पापकानि, सर्वाणि चापादयति क्षणेन ।।

अतश्च तस्याश्चिरभावनार्थं, मार्गं प्रवक्ष्ये स्वबलानुरूपं ।
गुरूपदिष्टं सुपरीक्षितं च मतिं स्वकीयामनुवर्तयित्वा ।।२।।

तत्रादौ सूत्रं व्याचिख्यासुः साध्यवसाय (विषय-) ग्रहणादौ श्रोतृणामवतारणार्थं प्रयोजनमाह । न हि प्रयोजनमन्तरेण प्रेक्षावान्क्वचित्प्रवर्तते । तदनन्तरं प्रयोजनोपायमुपदर्शयितुमभिधेयस्तावद्वक्ष्यते, (यतो हि) अभिधेयरहितं सूत्रं दशदाडिमानीत्यादिवाक्यवन्नेष्टप्रयोजनं साधयति । ततः सौकर्येण तदभिधेयग्रहणार्थं पिण्डार्थो वक्ष्यते ।

तदनन्तरं समासार्थप्रतिपत्तये पदार्थोऽभिधास्यते । ततः क्रमस्याविरोधं निदर्शयितुं पदानामनुसन्धिर्दर्शयिष्यते । तदनन्तरं पूर्वापरयुक्तिविरोधापनोदनाय चोदकं प्रति समाधानं वक्ष्यत इत्येव न्यायः । तत्र वज्रच्छेदिका इति सूत्रस्य नामधेयं । अनेनैव तावदभिधेयः प्रयोजनं चाभिधीयेते ।

(९७)
अत्र द्विधा वज्रच्छेदिका । सूक्ष्मक्लेशज्ञेयावरणानि वज्रवद्दुर्भेद्यानि, तेषां छेदनात् । एतेनास्य (ग्रन्थस्य) आवरणद्वयप्रहाणं तावत्प्रयोजनं निर्दिष्टं । अथवा छेदनं हि वज्राकारसादृश्येन वज्रवदिति । वज्रस्य हि उभे शिखरे स्थूले मध्यं च सूक्ष्मं । तथैवेयं प्रज्ञामिताप्यादावधिमुक्तिचर्याभूमिं अन्ते च बुद्धभूमिं विस्तरेण

निर्दिशति । सूक्ष्मेण तावन्मध्यभागेन शूद्धाध्याशयभूमिं निर्दिशति । अत एवेयं वज्राकारवदिति । एतेन भूमित्रितयमस्याः (वज्रच्छेदिकायाः) अभिधेयो निर्दिष्टः ।

पिण्डार्थस्तु संक्षेपेण पञ्चधा, तद्यथा- निदानम्, उपोद्घातः, बुद्धवंशानुपच्छेदः प्रतिपत्तिलक्षणम्, तत्स्थानञ्च ।

तत्र निदानं तु सूत्रारम्भनिमित्तम्, तच्चापि एवं मया श्रुतं इत्यारभ्य तेन खलु आयुष्मान्सुभूतिः इत्येतावत्पर्यन्तं देशितं । तस्य च सङ्गीतिकारैरात्मप्रामाण्यप्रतिपादनायोक्तत्वात् । एवं सुत्रान्तरेष्वपि वाच्यं ।

उपोद्घातस्तावत्प्रकरणेन सूत्रार्थव्युत्पादनार्थं संयुज्यते । अप्रस्तुताभिधानेन सर्वं असमञ्जसं स्यादिति तन्निराकर्तुं सर्वत्रापि प्रकरणेन योज्यं । अथ खल्वायुष्मान्सुभूतिरुत्थायासनातित्यादिना तन्निर्दिष्टं । बुद्धवंशानुपच्छेदोऽपि च तेनैव दर्शितः । आर्यसुभूतिना इमां प्रज्ञापारमितां बुद्धवंशानुपच्छेदकत्वेन विदित्वा यथा बुद्धवंशानुपच्छेदो भवेत्तथैवादौ संस्थापिता ।

प्रतिपत्तिलक्षणं तु बोधिसत्त्वयानसम्प्रस्थितेन कथं स्थातव्यम्? इत्यादिना प्रोक्तं ।

(९८)
तस्य प्रतिपत्तिलक्षणस्य स्थानं तावत्कस्मिन्विषये बोधिसत्त्वेन स्थातव्यम्? प्रतिपत्तव्यम्? चित्तं प्रग्रहीतव्यम्? यदेतत्तत्तस्य स्थानमिति । तदपि इह सुभूते ! बोधिसत्त्वयानसम्प्रस्थितेन एवं मया इत्यादिनारभ्य तारका तिमिरं इत्यन्तिमगाथां यावदभिहितं । प्रतिपत्तिलक्षणं तस्य स्थानं चेत्येताभ्यां द्वाभ्यां बोधिसत्त्वानामशेषकरणीयपरिपूर्णता सम्प्रकाशिता, इत्येष तावत्पिण्डार्थः ।

निदानं ः

पदार्थादयश्चेमे साम्प्रतमभिधीयन्ते- तत्र एवं इति शब्दोऽभ्युपगमादिनानार्थेषु दृश्यते । अत्र प्रकरणादिबलेन संन्निधापितार्थो ग्राह्यः । अयं हि वक्ष्यमाणसकलसूत्रार्थं व्यवस्थापयति । मया इत्यन्यव्यवच्छेदेन अर्थस्य साक्षाच्छ्रवणं निर्दिश्यते । आत्मनैव श्रुतं न श्रवणपरम्परायातमित्यर्थः । श्रुतं इत्यधिगमो निषेध्यते । तथागतादृते नान्ये स्वतस्ताथाभूतधर्माधिगमवन्तो भवन्ति । एतेनानाप्तप्वं निराक्रियते । एकस्मिन्समये इति एकस्मिन्काले, सर्वकालमेवंविधधर्मरत्नश्रवणं दुर्लभमित्याख्यातं । (९९) यद्वा स्वगतं बाहुश्रुत्यमुपदर्शितं । एकस्मिन्काले इदं श्रुतमन्यदा अन्यदपि श्रुतमिति दर्श्यते । अथ वा, एकस्मिन्समये भगवान्विहरति स्म इत्युत्तरेण सम्बध्यते । अपरिमितविनेयानां तेषां हिताय अन्यदा अन्यत्र विहरति स्म इति प्रतिपाद्यते । क्लेशस्कन्धमृत्युदेवपुत्ररूपाणां चतुर्णां माराणां भञ्जकत्वान्निरूक्तया भगवानिति स्मर्यते । अथ वा ईश्वर्यादिमत्त्वात्ऽभगवान्ऽ इत्युच्यते । यथोक्तम्-

ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः ।
ज्ञानस्याथ प्रयत्नस्य षण्णां भग इति श्रुतिः ।।

(१००)

श्रावस्ती इति श्रवस्तेस्तन्नामकर्षेराश्रमत्वाच्छ्रावस्ती नगरी, तयोपलक्षितो देशविशेषोऽपि तत्सम्बन्धेन श्रावस्तीत्युच्यते । देशोक्तया अयं देशोऽपि चैत्यभूतोऽभिधीयते, तद्यथा चैत्यभूतः स पृथिवीप्रदेशो भविष्यति इत्यत्राप्युक्तं । अथ च सङ्गीतिकारैरात्मवचनानामादेयताप्रतिपादनायैतत्सर्वमुक्तं । लोकप्रत्यायनार्थं तावत्[स] प्रदेशः साकारः समृद्धश्चेत्युक्तः, एवं सति परैः ग्राह्यं भवति वचनम्, नान्यथा तदादेयवचनमिति ।

श्रावस्तीप्रदेशस्य अत्यन्तं विस्तीर्णत्वात्कुत्र विहरतीति स्थाननिश्चयाभावाद्जेतवने इत्युक्तं ।sजेतृs इत्याख्यस्य राजकुमारस्य वनत्वाद्जेतवनमिति । तदपि तावत्कस्यचिदप्रसिद्धमिति सम्भावनायां अनाथपिण्डदस्यारामे इत्युक्तं । गृहपति-अनाथपिण्डद इत्यनाथेभ्यो दयया पिण्डदानेन तथा प्रसिद्धः, स खलु भगवदर्थं निरन्तरया रत्नानि विकीर्य जेतुः राजपुत्रादारामं क्रीतवान् । राजपुत्रजेतृणापि तत्र काचिद्भूमिरावासादिभिः समलङ्कृता, अतस्तयोस्तद्वनमिति प्रसिद्धिं गतं । कस्यचिदेकस्योपादानेन अभिप्रेतदेशविशेषस्यानवबोधात्पदत्रयमुक्तं । अथवा श्रावस्तीत्यनेन बहुनां मध्ये विहरणात्परार्थसम्पदभिहिता । जेतवनेऽनाथपिण्डदस्याराम इत्यनेन (च) विवेकविहरणात्स्वार्थसम्पत् ।

(१०१)

अत्र कः साक्षीति चिन्त्यमाने महताभिक्षुसंघेन इत्युक्तं । भिन्नक्लेशा हि भिक्षवः । मारादिभिः प्रत्यर्थिभिरभेद्यत्वात्तेषां समूहः संघः इत्युच्यते । महान्भिक्षुसंघस्तावत्भूयस्त्वेन आनुभावेनेति द्वैविध्येन, आनुभावस्तावद्दर्शितः । कथं भूयस्वमिति चेद्? सार्धमर्धत्रयोदशभिः (भिक्षु) शतैः इत्याद्युच्यते । तस्मिन्समये तावतामेव सत्त्वात् । भिक्षुसंघात्बोधिसत्त्वानां बाहुल्यं तु तेषामेवार्थाय सूत्राणां भाषितत्वात् । बोधौ सत्त्वमाशयो येषां तेऽबोधिसत्त्वाःs । श्रावकेष्वपि बोधौ सत्त्वं विद्यते, अतस्तेषां व्यवच्छेदाय महासत्त्वैः इत्याह । धर्म-चित्तोत्पाद-अधिमुक्ति-अध्याशय-सम्भार-काल-सम्प्रतिपत्तिलक्षणैः सप्तभिर्महत्त्वैरुपेत्वाद्महासत्त्वाः ।

तत्र धर्महत्त्वं तु बोधिसत्त्वेभ्यः शतसाहस्रिकाप्रज्ञापारमितादिविपुलधर्माणां देशनात् । चित्तोत्पादमहत्त्वं तावदनुत्तरायां सम्यक्सम्बोधौ चित्तोत्पादात् ।

(१०२)

अधिमुक्तिमहत्त्वं तमिन्नेव गम्भीरोदार धर्मेऽधिमुक्तत्वात् । आशयमहत्त्वं तु सर्वसत्त्वहितसुखोत्पादाशयात् । सम्भारमहत्त्वं तावदपरिमितपुण्यज्ञानसम्भरणात् । कालमहत्त्वं खलु त्रिभिरसंख्येयकल्पैर्बोधिप्राप्तेः । सम्प्रतिपत्तिमहत्त्वं हि अनुत्तरसम्यक्सम्बोधेर्निष्पादनात् ।

विहरति इति चतुर्भिरीर्यापथैः, अथवा अनुत्तरेण ब्रह्म-देव-आर्यविहारेण विहरति । स्म इति विहृतवानिति दर्शितं । तत्र भिक्षुसंघस्तु कृतकृत्यत्वाद्मृदुकारुणिकत्वाच्च सर्वकालं तथागतस्य पादान्तिके निषद्यत इति विदित्वा स्यास्नुत्वसंदर्शनार्थं पूर्वमुक्तः । बोधिअसत्त्वास्तु अपरिमेयसत्त्वार्थक्रियासाधन-परिनिष्पत्तौ

अकृतकार्यत्वात्, अधिमात्रकरुणया जगदर्थकरणाय लोकधातुषु विहरणात्सर्वकालं भगवतः पादान्तिकेऽनिषीदनाच्च पश्चादुक्ताः । अत एव श्रावकसूत्रान्तेषु नोच्यन्ते बोधिसत्त्वाः, न च तानि (श्रावकसूत्राणि) तदर्थानि, अनियतानि चेति ।

अथ इति तदनन्तरं । समये इति नियते । एतेन नियतस्तावत्पिण्डकाल इति । कालनियतत्वं तु अस्मिन्नेव काले पिण्डपातो ग्रहीतव्य इति, तदपि किमिति अपरिज्ञानात्तदर्थं पूर्वाह्णः इति वचनेनाभिधीयते । पूर्वाह्णञ्च कालसमयश्चेति समासः ।

उपवसतां प्रवजितानां च पिण्डकालोपलम्भेन पूर्वाह्णलक्षणं भगवता देशितमेकान्तेनेत्यवबोधनार्थं कालसमये इत्युक्तं । अन्यथा पूर्वाह्ण इत्येतद्वचनेन तदएकान्तत्वनिर्देशो नावगम्यते । भगवता स्वेच्छया कृतमिति सम्भाव्यमानत्वादेतत्पदत्रयमुक्तमिति वा । निवास्य इति गृहप्रवेशानुरूपं वस्त्रधारणं । तदपि शिक्षासु श्रोतृणां गौरवसम्पादनार्थम्, अन्यथा स्वस्यैव विनेयत्वाभावे कथं परस्य विनेयता स्यात् । चीवरमादाय इत्यत्र चीवरादानं (१०३) तावत्प्रावरणलक्षणं द्रष्टव्यम्, नास्त्यन्तस्यावकाश इति । महानगरी इति देशविशेषः, श्रावस्तीमात्रव्यवच्छेदार्थं । किमर्थं भगवान्पिण्डाय प्राविक्षतिति । श्रावकेष्वल्पेच्छताप्रवृत्तिः, दरिद्र-रोगि-गृहिणी-वृद्धादिष्वनुग्रहः, अन्धादिभ्यो नेत्रादिसम्प्राप्तिरिति, विविधविस्मयहेतूनामनवरतं प्रदर्शनेन भगवति च परेषां प्रसादोत्पादनार्थं इत्येतान्यपरिमितानि प्रयोजनान्यवगन्तव्यानि । कृतभक्तकृत्यः इति यः खलु भोजनादिभक्तकृत्यं सम्पादितवान्, स एवमुच्यते ।

अल्पकुशलमूलेभ्यो निर्जाता अपि ब्रह्मादयः कवलीकाराहारविनागान्नैव भक्तकृत्यं कुर्वन्ति, तर्हि अचिन्त्यकुशलमूलनिर्जातो हि भगवान्(बुद्धः) कथं कुर्यादिति? तथा आर्यधर्मसंगीतौ अपि भाषितं "तथागतस्तु क्षुत्पिपासावर्जितः मूत्रपुरीषविरहितोऽक्षीणकायश्च भवति" इति । सत्यमेवैतत्तथापि यदि भगवतः स कायो न परमार्थभूतः, तदा स्यात्सर्वोपालम्भावसरोऽपि, यदा त्वयं भगवतो निर्माणकायः, एवंविधचरितप्रदर्शनेन वेनेयसत्त्वाशयानुरूपं प्रवर्तते, तदा कथमुमालम्भावकाशः ।

मनुष्यभावे एव वीर्यारम्भेण एतादृशमनुत्तरपदं लभ्यत इति विनेयानामुत्साहनार्थं मनुष्यभावं दर्शयित्वा एवंरूपं पिण्डभक्तं दर्शितवान् । ये दायका दानपतयः तेषु पिण्डपरिकर्मप्रकाशनेन प्रहर्षः समुपजायते । भाग्यवन्तोऽपि किञ्चित्कर्मावरणवशात्प्रेतादिषु समुपजाताः महौजस्का यक्षादयः भगवतां करनखामृतेन संस्पृस्टं परमाक्षयदिव्यरसमादाय परिभुञ्जानाः परमसुखसंतृप्तचेतस उत्तमां समाधिं समवाप्नुवन्ति । अतः अपरिमेयं तावद्भगवतो भक्तकृत्यं ।

(१०४)

केन प्रकारेण भक्तकृत्यं कृतमिति चेत्? तदर्थं पश्चादित्याद्याह । सर्वमादाय तदनु यत्पिण्डपातं भक्तं तत्पश्चाद्भक्तपिण्डपातं । पूर्वमेतत्समादानं तु श्रावकाणां धूतगुणेष्ववतारणार्थं । भक्तमिति (भक्षणकृत्यं) सम्पादितमित्यर्थः । अथवा पश्चादिति यद्द्वितीयवारमादानं तत्पश्चाद्भक्तं । तदेव

पश्चाद्भक्तमपि पिण्डश्चापीति पदयोजना । अथवा अपारहणभक्तत्वेन यः परिभुज्यते पिण्डः स एवमुच्यते ।

अतश्च धूतगुणवत्त्वात्विकालभोजनपरिहृतत्वाच्च तद्विओरहितमेतद्भक्तं स्यादित्यर्थः । प्रतिशाम्य इति प्रतिष्ठाप्येत्यर्थः । तच्च शक्रादयस्तु भगवदाज्ञामादातुं समुद्यतास्तदन्तिके सदैवोपतिष्ठन्ते, किन्तु प्रव्रजितास्तु स्वयमेवानुतिष्ठन्त इति निदर्शयितुं भगवता स्वयं पात्रचीवरप्रतिष्ठापनं कृतम्, अलभ्यमानभृत्यानां मन्दभाग्यानां दौर्मनस्यपरिहाणार्थमपीति ।

अशुच्याभासं सततसमितपाकर्तुं कमलेषु पादनिक्षेपणम्, क्रियान्त्राद्यधिमुक्तसत्त्वाशयानुवर्तनं वा सरजस्कपादाभ्यां शयनासनानामनवमर्दनं इति शिक्षायामादरं दर्शयितुं पादप्रक्षालनं द्रष्टव्यं ।

प्रज्ञप्त एवासने इति देवादिभिः प्रज्ञप्ते । ऋजुकायं प्रणिधाय इति नातिनम्रं नातिस्तब्धमित्यर्थः । कथं धर्मदेशनाकाले भगवान्समाहितेन ईर्यापथेन (१०५) न्यषीददिति चेत्? समाहितैरेव धर्मोऽयं ज्ञातुं श्रोतुं वा शक्यते नान्यैरिति समाधौ यत्नोत्पादाय लोकाअनां प्रवर्तनात् ।

प्रतिमुखीं स्मृतिमुपस्थाप्य इति पूर्वं बोधिसत्त्वावस्थायां तावदनुत्तरपदं प्राप्य यथा बुद्धवंशानुपच्छेदः स्यात्तथाहं करिष्ये इति यत्प्रणिधानं कृतं तत्प्रणिधानं स्मरणाभिमुखीकृतमित्यर्थः । भगवांस्तु बुद्धः सदा समाहितः सन्नपि सर्वथा स्मृतौ विहरति । असमयस्मरेण न किञ्चित्स्यात् । समये प्रणिधानस्मरणं हि सफलं भवति । समये स्मरेणनापि भगवतः सदा समाहितत्वं न विरुध्यते ।

अथ खलु संबहुला भिक्षवः इत्यनेन किमुक्तम्? यत्परिमाणेन भिक्षुसंघेन सह भगवान्श्रावस्त्यां विहरति स्म, स सर्वः धर्मदेशनाकाले तत्र नैव सन्निपतितः । त्रिभ्योऽधिकास्तत्र सन्निपतिता इत्युक्तं । तच्च सङ्गीतिकारैः परसम्प्रत्ययोत्पानादनार्थं निर्दिष्टं । सन्निपतितः इति सन्निहित एव । सन्निषण्णः इत्यासने उपविष्टः । लोके प्रायः समान्यपूर्वकं विशेषः स्थाप्यत इति लोकप्रसिद्ध्यनुरूपमुभयमाह । अन्यथा निषण्णः इत्येतावत्मात्रेण अप्युभयमुक्तं स्यादिति । उक्ता निदानपदार्थाः ।

उपोद्घातो बुद्धवंशानुपच्छेदश्च ः

सम्प्रति उपोद्घातो बुद्धवंशानुपच्छेदश्च कथयिष्येते । परमाश्चर्यमादर्शयितुं द्विरभिधानं । सुगत इति सम्बोधनं । नैरात्म्यद्वयमार्गेण (१०६) सम्यग्गत इति सुष्ठुरूपेण गतः सुगतः सुरूपवदिति । अथवा निखिलसवासनाशेषक्लेशज्ञेयावरणानि प्रहाय गतः सुगतः, सूपूर्णघटवत् । अथवा अपुनरावृत्त्या गतः सुगतः, सुनष्टज्वरवत् । यावतैवानुग्रहीताः, तावतैवानुपरिगृहीता इत्यर्थः ।

राजादयोऽपि आश्रितान्प्रजादीन्यथाशक्ति अनुपरिगृह्णन्ति किन्त्वत्र भगवति आश्चर्यमित्याशङ्काकायां किमाश्चर्यमिति तथागतेनार्हता सम्यक्संबुद्धेन इत्युक्तं । यथावद्वस्तुतत्त्वदेशनात्तथागतः । अथवा यथा पूर्वका नैरात्म्यद्व र्गेण गताः क्लेशज्ञेयावरणप्रहाणमधिगताः, अत्रापि तथा गतत्वात्तथागतः ।

सर्वलोकाभ्यर्हणीयत्वात्, अरीणां क्लेशानां वा हन्तृत्वादर्हन् । समस्तज्ञेयानां सम्यगबोधात्सम्यक्संबुद्धः । एभिः पदैर्भगवतः प्रहाणज्ञानरूपा स्व-परार्थसम्पदुपदर्शिता भवन्ति ।

(१०७)

एतेनैवमभिधीयते- राजादीनां प्रजादिष्वनुग्रहे तावन्नैवाश्चर्यम्, यतो हि ते लाभसत्कारादिस्वार्थार्थितया पराननुगृह्णन्ति, भगवतस्तावत्तथागतत्वेनार्हत्त्वेन सम्यगभिसम्बुद्ध्य अधिगताशेषसम्पत्तितया योऽनुग्रहः स खल्वत्र आश्चर्यमित्यादर्शितं । ऋते करुणां भगवतोऽनुग्रहेऽस्मिन्नास्ति किञ्चिदनुग्रहकारणान्तरमित्यनेनाभिहित एव भवति भगवान्महाकारुणिकः ।

अनुपरिगृहीताः इति अभिसम्बुद्धेन भगवता धर्मचक्रप्रवर्तनाकाले परिपक्वकुशलमूला बोधिसत्त्वा भूमिष्ववतारिताः, धर्मतायां बोधिसत्त्वानां प्रतिष्ठापनेन । परीन्दिताः इति अपरिपक्वकुशलमूलानां आदिकर्मिकाणामनुग्रहाय त एव परीन्दिताः, धर्मतायां बोधिसत्त्वान्प्रतिष्ठापयितुं । मम परिनिर्वाणप्रदर्शनं तु युष्मास्वप्राप्तगुणानामधिगमाय, प्राप्तानां च सम्यगपरिहाणायेति । एवमनुग्रहपरीन्दनेत्युभाभ्यां बुद्धवंशानुपच्छेदः सम्प्रकाशितः ।

बोधिसत्त्वेष्वनुग्रहस्तु पञ्चधा सम्यग्वेदितव्यः- काल-विशेषता-उदारता-स्थिरता-व्यापकताभिः । तत्र कालः- जन्मजन्मातरत्वात् । विशेषता-तैर्थिक-श्रावक-प्रत्येकबुद्धेभ्योऽनुग्रहेण विशिष्टत्वात् । उदारता- अनुत्तरत्वात्तदनुग्रहस्य । स्थिरता- आत्यन्तिकत्वात् । व्यापकता- तदनुग्रहेण तु स्व-परसन्तत्योर्हितसम्पादनात् ।

(१०८)

परीन्दनापि त्रिधा सम्यग्द्रष्टव्या, आश्रय-धर्मताप्रापण-ज्ञप्तिचवनैः । कीदृशस्तावदाश्रयः? कल्याणमित्रेषु परीन्दनात्सा भवत्यविप्रणष्टा । किं तावद्धर्मताप्रापणम्? अनुपरिगृहीता बोधिसत्त्वा धर्मतया परानानुग्राहयन्ति । किं तर्हि ज्ञप्तिवचनम्? त्वया अन्ये बोधिसत्त्वा अनुग्रहीतव्या इत्याज्ञापितम्, न त्वनादरभावः । उपोद्घात-बुद्धवंशानुपच्छेदपदार्था उक्ताः ।

प्रतिपत्तिलक्षणं ः

प्रतिपत्तिलक्षणं तावदुच्युते- तदधिकारेण कथं इत्युक्तं । आर्यसुभूतिः खलु षड्विधप्रयोजनार्थं पृष्टवान् । १ संशयोपच्छेदाय, २ अधिमुक्तिसमुत्पादाय, ३ गम्भीरेष्वर्थेष्ववतारणाय, ४ अविनिवर्तनाय, ५ परमप्रमोदसञ्जननाय, ६ सद्धर्मस्य चिरस्थित्यै च ।

तत्र प्रज्ञापारमितेयं कथं बुद्धवंशस्य अनुपच्छेदं करोतीति सन्देहकारिणां संशयोपच्छेदनार्थं । अपरिपक्वसन्ततीनां बोधिसत्त्वानां पुण्यबाहुल्यख्यापनेन प्रज्ञापारमितासु अधिमुक्तिसमुत्पादनार्थं । परिपक्वसन्ततीनां तावद्गम्भीरेष्वर्थेष्ववतारणार्थं । अभूतप्रतिपत्तिपरिभूतानां

तदुद्ग्रहणधारणयोर्व्यायच्छतां पुण्यवाहुल्याभिकाङ्क्षया अविनिर्वतनार्थं । अनुगृहीतेषु विशुद्धाध्याशयेषु स्वाधिगततद्धर्मदर्शनेन परमप्रमोदसञ्जननार्थं । अनागते काले महयानसद्धर्मस्य चिरमवस्थानार्थं ।

समासतस्तु सन्दिग्धानां सम्यक्सम्प्रकाशनाय, पुण्याभिकाङ्क्षणां अपरिक्वबोधिसत्त्वानां सम्यगवतारणाय, विप्रतिपत्तिविहतानां सम्प्रहर्षणाय, शुद्धाध्याशयानां प्रमोदाय च । तत्र स्थातव्यं छन्दप्रणिधानाभ्यां । प्रतिपत्तव्यं योगसमापत्त्या । चित्तं प्रग्रहीतव्यं विक्षेपनिग्रहेण । तत्र (१०९) छन्दस्तावदभिलाषः । प्रणिधानं तु अभिलषितार्थेऽभिसंस्कारलक्षणेन यच्चिन्तनं । योगसमापत्तिः खल्ववितर्कसमाधिः । विक्षेपनिग्रहस्तावत्समाधितो विक्षिप्तं चित्तं विक्षेपेभ्यो निवार्य तत्रैव विनियोजनं । प्रथमेन प्रयोगमार्गः, द्वितीयेन परिनिष्पत्तिमार्गः, तृतीयेन त्वविप्रणाशमार्गः परिदेशितः ।

स्थाने पृच्छतो भगवानार्यसुभूतये साधुकारमदात् । शृणु इत्यवहितश्रोत्राभ्यां श्रोतुं प्रवर्तस्व । साधु इत्यविपरीतप्रतिपत्त्या उद्ग्रहीतुं । सुष्ठु च मनसि कुरु सम्यक्तया उद्ग्रहीतुमुद्युक्तो भव इत्यर्थः । तदपि अवाङ्मुख-अशुचि-सच्छिद्रभाण्डानामिव श्रोतृजनानां यथाक्रमं त्रिविधदोषपरिहारार्थमिदमुदीरितमिति । भाषिष्ये इति तेभ्य एव सम्प्रकाशयिष्यामि, नान्येभ्य इति । अन्यथा अवाङ्मुख-अशुचि-सच्छिद्रभाण्डेषु अम्बुवृष्टिरिव (११०) धर्मवृष्टिरपीयं निरर्थकैव स्यादित्यर्थः । अथवा अहं तु केवलं देशयिष्यामि त्वमेव तावद्यत्नतः प्रतिपद्यस्वेत्यर्थः ।

बोधिसत्त्वयानेति बोधिसत्त्वानां यानम्, येन बोधिसत्त्वा निर्यान्ति । तच्च दशभिः पारमिताभिः दशभिश्च भूमिभिः परिगृह्यते । तत्र सम्प्रस्थानं तावत्प्रणिधिप्रस्थानचित्ताभ्यां सम्प्रवर्तनं । एतद्विशेषणं तु श्रावकादिबोधिप्रतिषेधार्थम्, बोधिसंप्रस्थितेन इत्येतावदुच्यमाने बोधीनां त्रित्वादन्यस्या अपि बोधेरवगमः स्यादिति । प्रत्यश्रौषीतित्यभ्युपगमादित्यर्थं । उक्ताः प्रतिपत्तिलक्षणपदार्थादयः ।

प्रतिपत्तिस्थानं ः

साम्प्रतं तत्स्थानान्यभिधीयन्ते । तत्स्थानानि तावत्समासतोऽष्टादशप्रकाराणि; तद्यथा-

१. चित्तोत्पादः
२. पारमितायोगः
३. रूपकायाप्तिकामता
४. धर्मकायाप्तिकामता
५. भावनाविशेषलाभेऽनभिमानः
६. बुद्धोत्पादारागता
७. क्षेत्रविशुद्धिप्रणिधानम्
८. सत्त्वपरिपाकः

(१११)

९. बाह्यशास्त्रेषु व्यपगतरागता
१०. सत्त्वभाजनलोकयोः पिण्डग्राहविशीर्णतायोगः

११. तथागतपूजासत्कारः

१२. कायचित्तपरिश्रान्तौ वीर्यवैमुख्यानारम्भलासत्कारविरहितता । कायचित्तपरिश्रान्तौ वीर्यारम्भोतोविनिवृत्तिः, न आरम्भ इत्यनारम्भः । अहो, आरब्धवीर्योऽयमिति परेण ज्ञायमाने सति श्रद्धामागम्य लाभसत्काराध्यवसितत्वं । तस्माद्बोधिसत्त्व एतेभ्यः सर्वेभ्यो विमुच्य प्रजहयात् ।

१३. दुःखाधिवासनम्

१४. ध्यानास्वादविरतिः

१५. अभिसमयकालेऽहमितिविकल्पवियोगः

१६. अववादपर्येषणम्

१७. अभिसमयः

१८. बुद्धभूमिपर्येषणं च ।

एतानि तावदष्टादशविधानि स्थानानि, यत्र बोधिसत्त्वेन स्थातव्यं प्रतिपत्तव्यं चित्तं च प्रग्रहीतव्यमिति । एतैः स्थानैर्भूमित्रयं संगृहयते, तद्यथा- षोडशभिः स्थानैरधिमुक्तिचर्याभूमिः, अभिसमयस्थानेनैकेन शुद्धाध्याशयभूमिः, बुद्धभूमिपर्येषणेन च बुद्धभूमिः संगृहयते । सर्वसत्त्वपरिनिर्वापणचित्तमुत्पाद्य पारमितायोगी तावत्तथागतस्य रूपकाय-धर्मकायप्राप्तौ छन्दमुत्पादयति । ततः आ अभिमानं अन्तिमं अहं-विकल्पं यावदभिसमयस्तान्तरायेभ्यश्चित्तं विप्रकर्षते । ततश्चाभिसमयार्थमववादं पर्येषते, तदनन्तरमभिजानाति, तदूर्ध्वं बुद्धभूमिं पर्येषते । अयमेव तेषां क्रमः ।

१. चित्तोत्पाद-स्थानं ः

तत्र बोधिचित्तमधिकृत्य यावन्तः सत्त्वाः इत्याह । यावतिति परिमाणं । किं तत्र परिमाणम्? सत्त्वसंग्रहेण इत्युक्तम्sसत्त्वधातुस्तु (११२) अपरिमितः, अथापि सत्त्वः सत्त्व इति यस्तत्स्वभावः तदितरव्यावृत्तशब्दाध्यारोपितार्थसभागरूपेण ख्यातः स एव सत्त्वेन संगृहयते । तेन दृश्यविकल्प्ययोकत्वेनाभिसंक्षिप्य तद्रूपेणाध्यवसितत्वाद्रूपादिस्कन्धविशेषैरुपादीयन्ते । अतस्ते आयुष्मानिव प्रतीयन्ते ।

एवं सामान्यतो निरूप्य विशेषतो दर्शयितुमाह- अण्डजाः इत्यादि । विशेषलक्षणं तावत्त्रिभिः प्रभेदैरभिहितं । योनिभेदेनाण्डजादयश्चत्वारः । स्थानभेदेन तु रूपिणामरुपिणां च पृथक्स्थानत्वात् । कामावचरा रूपावचरास्तावद्रूपिणः, अरुपावचरास्तु अरुपिणः । निमित्तोद्ग्रहणभेदेन संज्ञिनः इत्यादयः । बृहत्फलस्यैकदेशं भवाग्रजांश्चं सत्त्वान्विहाय सर्वे सत्त्वाः संज्ञिनः । बृहत्फलस्यैकदेशस्तावदसंज्ञीनः । अयमपि निमित्तोद्ग्रहणभेदात्मक एव, तदभावभेदेनोपलक्षितत्वात् । भवाग्रजास्तावद्नैव संज्ञिनो नासंज्ञिनो वा । प्रभेदोऽयं मन्दमेधसामनुग्रहायैव कृतः, अन्यावध्यानपरिहारार्थं तावन्नैव प्रपञ्चितः ।sसर्वे धर्माः निःसत्त्वाःऽ इत्यनेन सह वचनस्यास्याविरोधः प्रदर्शितः । अत्र सत्त्वधातुरिति सांवृते सत्ये सत्त्वधातुस्तं दर्शयितुं यावानित्याद्याह । प्रज्ञप्यमानः इति पञ्चस्कन्धविशेषात्मकत्वेन प्रज्ञायत इति, न तु तैर्थिकाः प्रज्ञप्त्या प्रज्ञपयन्तीत्यर्थः । अनेनापवादान्तस्तावत्परिहृतः, प्रज्ञप्तावपवादाभावात् ।

यस्मिनप्रतिष्ठितनिर्वाणधातौ सास्रवोपधिर्नाशिष्यते, स तथोच्यते । श्रावकाणां परिनिर्वाणं तावद्नात्र निर्वाणधातु; तस्य हीनत्वात् । प्रणीतफले संविद्यमाने कृपालूनां हीनफलार्थिता न खलु युक्तिमती । संविद्यमानेऽपि प्रणीतफले प्राप्तुमशक्यत्वादेवं प्रार्थ्यत इति चेत्? त्वन्मतानुसारं तावद्त्रिविधगोत्रत्वादगोत्रत्वाच्च सर्वैः हीनफलमपि प्राप्तुं नैव शक्यते ।

(११३)
अथ बोधिसत्त्वगोत्रं तावत्तथाविधं यद्वशतया महाकरुणावेगाभिभूतेन (मया) कथमिदं शक्यमिति, संविद्यमानेष्वपरेषु परार्थकारिषु बुद्धबोधिसत्त्वेषु निरर्थकेन मयात्र प्रणिधानेन किमिति विचारान्सन्त्यज्य परप्रत्ययतां च दूरीकृत्य महाकरुणार्द्रः जाज्वल्यमानेन दुःखाग्निना पीड्यमानं जगद्विलोक्य अहमेव तारयिष्यामीति चिन्तयमानः प्रणिदधाति । यथोक्तम्-

दुष्करादुष्करां वेति कल्पनां परिहाय च ।
अभ्युपेतं जगच्चार्तमित्यास्येन स्वयं त्वया ।।

इति । यद्यप्येवम्, तथापि प्रियपुत्रस्य नृपत्वाय प्रणिधानमिव सत्यप्यप्राप्ये प्रणीतफले कथन्न प्रणिधानमिति । किमर्थं हीनमेव प्रार्थ्यते । अत एवाप्रतिष्ठितनिर्वाणं एवात्र अनुपधिशेषनिर्वाणधातुर्युज्यते । तत्र सास्रवोपधेः शेषत्वाभावात् ।

निर्वापयितव्याः इत्येतावन्मात्रं कस्मान्नोक्तम्? प्रथमादिध्यानानां व्यावृत्त्यर्थमिति । तानि तावदधोभूमिक्लेशाभावाद्निर्वाणपर्यायेणोक्तानि भगवता । सोपधिशेषे निर्वाणधातौ इति कस्मान्नोक्तमिति चेत्? दुःखोपधिशेषस्याप्रहीणत्वात्तत्र । सर्वसत्त्वनिर्वापणाशयस्तु बोधिसत्त्वानां त्रिभिर्हेतुभिर्द्रष्टव्यः, तद्यथा-

१. अक्षणोत्पन्नेभ्यः कालान्तरावस्थानम्, अक्षणावस्था तावदुपलक्षणमिति । नैतावन्मात्रं । तस्यामवस्थितौ परिनिर्वाणं नैव सम्भाव्यते ।
२. अपरिपक्वानां परिपाचनं ।
३. परिपक्वानां विमोक्षणं च ।

तस्मान्नाशक्तार्थिता (तेषाम्) । निखिलसत्त्वानां परिनिर्वापणाशयेन अनेन आदार्यं तावद्बोधिचित्तस्यादर्शितं । छन्दप्रणिधानाभ्यां कथं स्थातव्यं- (११४) तदप्यत्रावेदितं । कथं योगसमापत्त्या प्रतिपत्तव्यमिति तद्देशयितुमाह एवं इत्यादि । संवृतौ सर्वसत्त्वानां परिनिर्वापणेऽपि यथा परमार्थतो न कोऽपि सत्त्वः बोधिसत्त्वेनोपलभ्यते, तस्याअभावादित्येवं योगमापत्त्या प्रत्यवेक्षणीयं । व्युत्थितो भूत्वा न परमार्थतः कोऽपि सत्त्वो मया परिनिर्वापितः इति यश्चित्तोत्पादस्तेन गम्भीरत्वं परमार्थबोधिचित्तत्वञ्च दर्शितं भवति, पूर्वेण तु संवृतिरिति । तेन विक्षेपनिग्रहेण कथमत्र चित्तं प्रग्रहीतव्यमित्यादर्शयितुमाह- तत्कस्य हेतोः? सचेतिति यदीत्यर्थः ।

अथ यः पुद्गलादिसंज्ञया प्रवर्तते किं स बोधिसत्त्व इति वक्तव्यः? सत्त्व इत्युक्तौ पुनः कस्य हेतोः इति प्रश्नेनेतराभिरपि (संज्ञाभिः) न वक्तव्यः इत्याह । अस्यायमभिप्रायः- कुमतिभिस्तावत्पञ्चस्कन्धातिरिक्तः अन्तर्व्यापारवांश्चतुर्णां भोगानां भोक्ता एकः पुरुष इति परिकल्प्यते सत्त्वः, जीव इत्यादिशब्दैश्च व्यवह्रियते । ये चानिर्वचनीयत्वेन पुद्गलमिच्छन्ति तैरपि तस्य स्कन्धस्वभावविलक्षणत्वेनाभ्युगतत्वात्तद्बलेनार्थान्तर एवाभ्युपेयते । न कदापि पदार्थोऽनिर्वचनीयः सम्भवति, सर्वस्याप्यनिर्वचनीयत्वप्रसङ्गात् । तत्साधकप्रणाभावाद्बाधकसद्भावाच्च तद्द्रष्टा बोधिसत्त्वो विपरीताभिनिवेशेन विपर्यस्त एव भवति । यः खलु विपर्यस्तः स कथं परमार्थबोधिसत्त्वः?

अन्ये पुनराहुः- अस्ति तावदात्मसाधकं प्रमाणमिति । तथा हि-बन्ध-मोक्ष-मार्ग-हेतुफलसम्बन्धस्मृतिप्रत्यभिज्ञादीनामेकाधिकरणकत्वे तावत्प्रसिद्धे नैरात्म्यवादिनां युष्माकं मते तु यस्तदाधार एकः प्रसिद्धः स नास्ति कश्चिदिति कस्तावदाधारः? विज्ञानक्षणानां प्रतिक्षाणं पृथक्त्वात् । बद्धो (११५) देवदत्तः मुक्तश्चान्यो यज्ञदत्त इति नैव व्यवस्था, न चान्यः प्रत्यनुभविष्यति अन्येन कृतस्य कर्मणः फलमित्यतिप्रसङ्गः । कृतविप्रणाशोऽकृताभ्यागमश्च प्रसज्येते । तथा हि- कर्तृत्वेन प्रज्ञप्तो यो हि विज्ञानक्षणः, तस्य फलेनानभिसम्बन्धात्कृतविप्रणाशाख्यो दोषः । अकर्तुश्चैव तस्य फलेन योगादकृताभ्यागमो दोषः स्यात् ।

स्मृत्यादिकं अ भिन्नाधिकरणकमिति न लोके प्रतीतं । अथ कथमिति चेत्? एकाधिकरणकमेव । देवदत्तस्य चित्तानुभवः यज्ञदत्तचित्तेन न स्मर्यते वा प्रत्यभिज्ञायते वा । येनानुभूयते तेनैव स्मर्यते प्रत्यभिज्ञायते वेति प्रसिद्धं । फलतश्चैक एव पुरुषः सर्वावस्थास्वनुगन्ता भवति । प्रयोगः- यौ बन्धमोक्षौ तावेकाधिकरणकौ, यथा- देवदत्तस्यैव शृङ्खलाबन्धनं मोक्षश्च । विवादास्पदीभूतौ बन्धमोक्षावपि बन्धमोक्षावेवेति बन्धमोक्षावेवेति स्वभावहेतुः । तथैव कर्त्रादेरप्येकाधिकरणत्वसाधने प्रयोगाः कल्पयितव्या इति ।

तत्र यदि स्वतन्त्रस्यैकस्य परमार्थसतो नित्यस्य पुरुषस्याधिकरणत्वं साध्यते, तदा तथाविधेन पुरुषेण सह क्वापि हेतोः सम्बन्धासिद्धेरनैकान्तिकत्वम्, सर्वेषां संस्काराणां क्षणिकत्वात्, देवदत्तादेः नित्यत्वैकतस्वभावासिद्धेः दृष्टान्तस्यापि साध्यविकलत्वं । अत एव विरुद्धो हेतुः तद्विपर्यव्याप्तत्वात् ।

अथ एकाधिकरणत्वमात्रं साध्यते, तदा सिद्धसाधनं । एकसन्तानप्रवृत्तत्वेन तेन बन्धनादीनामेकाधिकरणत्वमिष्यत एव ।

(११६)
अपि च, यदा यत्र सन्तानेऽविद्यादिकं कार्यकारणभावेनाविच्छिन्नं निरन्तरं प्रवर्तते, तदा स बद्धः इत्युचर्यते, स एव पुनः श्रुतमयादिक्रमेणार्यमार्गोत्पादादविद्यादिनिरोधेनाश्रयपरावृत्तौ मुक्तः इत्युपचर्यते । उभावपि तौ बन्धमोक्षौ नित्यैकपरमार्थवस्तुविषयकौ नतरां सिद्धौ । लौकिकबन्धमोक्षयोरपि तथात्वात् ।

यस्मिन्सन्ताने शुभू वा अशुभो वा चित्तानुभवः समुत्पद्यते, तस्मिन्नेव कालान्तरे सन्ततिपरिपाकमागम्य मस्तुलुङ्गलाक्षादिरसावसिक्तसन्ततिपरिपाक इव सुख-दुःख-स्मृत्यादिफलोदयो दृष्टाः, तस्माच्छुभादीनामेकाधिकरणत्वं तावत्प्रसिद्धं । नैव खलु कश्चिदेकः कर्ता भोक्ता स्मर्ता वा । सर्वेषामेतेषां व्यवहारस्य प्रज्ञप्तेर्वा कार्यकारणभावमात्रेण प्रभावितत्वात् । न चातिप्रसङ्गः, नियतसामर्थ्यवतो बीजादेरिव कारणशक्तेः प्रतिनियतत्वात् । ततश्च येषु कार्यकारणभावः प्रतिनियतः तेषु नैव कश्चिदेकोऽनुगतः भिन्नावस्थश्च परिदृश्यते । इह सत्त्वहेतोस्तथात्वे सति किमनेनात्मना परिकल्पितेन । आत्मोपचारस्य या खलु कर्त्राद्यवस्था, सा तावद्हेतुः, या खलु भोक्त्राद्यवस्था, सा फलमित्येवंविधो हि कार्यकारणभावोऽवश्यमभ्युपेतव्य इति । अन्यथा तयोरुभयोरप्यवस्थयोरनुपपन्नत्वे परस्परोकारकत्वाभावे वा आकाशमिव कथं तावत्तावत्सिध्येत्भोक्त्रादिः । शक्तिप्रतिनियमोऽप्यभ्युपगन्तव्य एव । इत्थं प्रतिनियतात्मना सम्बन्धेन सुखादीनां सम्भवः न तु सर्वत्र । अतः (११७) कार्यकारणभावेन दृश्यमानानि कुशलादीन्येव कर्ता, भोक्ता च स्यात्, किमनेनादृष्टस्वभावेन आत्मना परिकल्पितेन ।

अथ नानुमानेन आत्मा सिद्धः स्यात्, तथापि प्रत्यविषयत्वादहंबुद्धेः प्रत्यक्षत एवात्मा सिध्यतीति चेत्? तदपि तावन्न युज्यते, भ्रान्तत्वात्सविकल्पत्वादसिद्धत्वाच्च प्रत्यक्षेण तत्राहंबुद्धेरिति । अहंबुद्धौ प्रतीयमानत्वे यथा खलु प्रत्यक्ष एको नित्यो विभुश्चात्मा स्वसिद्धान्तैरुकल्प्यते तथा नैवोपलभ्यत इत्यवश्यमेव द्रष्टव्यं । अन्यथा अहंबुद्धेर्यदि प्रत्यक्षत्वं स्यात्तदा विवादमानेषु तावन्नैव प्रवर्तेत आत्मविषये कश्चन विवादः, सविकल्पाया अहंबुद्धेर्निश्चयात्मकत्वात्, निश्चयेन च विषयीकृते अध्यारोपाभावाच्च ।

एवमेवान्योऽन्येष्वप्येवञ्चातीयेषु सम्भवाद्विप्रलम्भः । अनादिकालाभ्यासवशात्प्रतिनीयतेषु रूपादिस्कन्धेषु एकत्वमध्यारोप्य परं व्यावर्तीयतुमहमिति प्रतीतिः, तस्यां प्रतीतौ तेषामेव रूपादीनां प्रतिभासमानत्वात् ।

काये चायमात्मग्रहः, कथं तर्हि मम देह इति भेदमात्रग्रहणमिति चेत्? तच्चात्मालम्बनेऽपि तुल्यं । यदि चात्मनि अयमात्मग्रहः, कथं तर्हि मम आत्मा इति चिन्त्यते । अथ वस्तुतोऽभिन्नेऽपि भेदान्तरपरिहारेण तन्मात्रजिज्ञासायां शिलापुत्रकस्य शरीरवद्भेदोपचारेण ग्रहणान्नास्ति विरोध इति चेत्? देहालम्बनेऽपि चैतत्समानं ।

आत्मा खलु विषयः पुनः क्रमोत्पत्त्या विरुध्यत इति पश्चात्वक्ष्यते । न केवलमात्मग्रह आत्मा अपितु तद्विषयो रूपादिरात्मास्तीत्यपि वक्तुं न शक्यते, तदविलक्षणत्वात्तस्य । क्रमेणोपलभ्यमानत्वान्न ते एकस्वभावाः, न च स्वतन्त्राः । अत एवोक्तम्-

न चात्मदृष्टिः स्वयमात्मलक्षणा
न चापि दुःसंस्थितता विलक्षणा ।

नामव्यवहास्य तु अभीष्टत्वान्नात्र कश्चिदपि विवादः । अत एव नास्ति किञ्चिदात्मप्रसाधकं प्रमाणं । नास्ति प्रत्यक्षमनुमानं च व्यतिरिच्य प्रमाणमित्यन्यत्र विचारितं ।

(११८)

बाधकप्रमाणं तावन्निराक्रियते- यद्येवमात्मा स्कन्धेभ्योऽभिन्नस्तदा स्कन्धवत्क्षाणिकः स्यादथवा स्कन्धाः खल्वात्मवन्नित्याः स्युः, तदभिन्नत्वात्, स्कन्धवदनेकत्वप्रसङ्गोऽपि दुर्निवारः स्यात् । अतः स्कन्धेष्वेव आत्मेति प्रज्ञप्यते, न तावन्नाम्नि विवादः ।

अथ स्कन्धेभ्यो भिन्न आत्मा इष्यते तदा सुखादिनासम्बद्धत्वे न सिध्येत्तस्य भोक्तृत्वादिकं । तत्र प्रयोगः- यो नास्ति सुखदुःखादिभिः सम्बद्धः स नास्ति कर्ता वा भोक्ता वा, मुक्तः संसारी वापि न युज्यते, यथा वन्ध्यापुत्रः । आत्मापि तथार्थक्रियादिभिर्न कथञ्चनापि सम्बध इति व्यापकानुपलब्धिः । न चायमसिद्धो हेतुः, तथा हि- सुखादिना हि सम्बन्धे सति आधाराधेयलक्षणो वा संयोगलक्षणो वा कार्यकारणलक्षणो वेति पक्षत्रयं ।

न तावत्प्रथमः पक्षः, अकिञ्चित्करत्वात् । तथा हि- अधःप्रसर्पणधर्मिणां जलादीनामधोगमनप्रतिबन्धकत्वेन व्यवस्थाप्यते तावदाधारः । सुखादीनाममूर्तत्वान्न सम्भवति (तेषाम्) अधोगमनमिति कथमिव आत्मन आधारत्वमिति । स्थित्यापि नाधारः, स्थितेः स्थातुरभिन्नत्वात्, तस्यैव कारकत्वमिति? तदपि तावन्निषिध्यते । स्थितेः पृथकत्वे सति सा नैव तावत्स्थातुरुपकारिका अर्थान्तरभूतत्वात्तस्याः । नास्त्येव तस्यां स्थातुरुत्पादसामर्थ्यम्, असामर्थस्य सर्वत्रैवाभिव्यक्तत्वात् । स्वयं भङ्गात्मनः तावन्नास्ति कश्चन स्थापकः, अनवस्थितत्वात्तस्य, अन्यथा तेन भङ्ग एव तस्य स्यान्न तावदवस्थानं । अविपरिणामात्मनि तावत्स्थापकेन किं क्रियते, स्थीरात्मना स्वभावेन स्वयमवस्थितत्वात् ।

(११९)

अत एवाकिञ्चित्करत्वेन संयोगसम्बन्धोऽपि तावन्नैव युज्यते, अतिप्रसङ्गात् । एवं हि सति सर्वस्य सर्वसंयोगहेतुत्वं । एवं च नैवोपपद्यते तावद्भिन्नार्थेन भिन्नार्थस्य संयोगः, सर्वस्य स्वयमवस्थितत्वात्लौहशलाकावत् । अपि च, संयोगबलेन यदि आत्मा सुखी वा दुःखी वा भवेत्, तदा संयोगैकत्वमेव स्यात्, अविशिष्टत्वेन प्रतिनियतात्मभिः सुखादिभिर्नैव स्यात्सम्बन्धः । तत एवात्मना सहैकत्वे सुखादिना नैव स्यात्कश्चित्सुखी वा दुःखी वा । अदर्शनेऽपि बलेनाभ्युपगते निश्चये तेनैव निश्चितः स्यात्तदा किं तावत्संयोगपरिकल्पनया, सर्वसामर्थ्यविरहितत्वात्तस्य । सम्बन्धिभेदेन भिन्नायामपि प्रज्ञप्तौ परमार्थतः भावानामभिन्नस्वभावे सति कथं स्वभावभेदाश्रितः पृथगर्थक्रियाभेदः स्यादिति कुमतिपरिकल्पित एवायं खलु सम्बन्धः ।

न चापि कार्यकारणसम्बन्धः । क्रमेण वेद्यमानत्वात्सुखादिनां । अविकले हेतौ सति न युज्यते तावत्कादाचित्ककार्यसम्भवः, अविशिष्टत्वात् । परैरनाधेयातिशयोऽप्रतिबद्धसामर्थ्यो वा खल्वात्मा कथं सहकारिकाकारणमपेक्ष्यक्रमेणोत्पादयेत्, न हि सहकारिणि तदपेक्षा । दुःखोत्पादहेतुत्वाद्यदि बद्धस्तदा

सर्वथा बद्धत्वान्नैव मुक्तः स्यात्, तत्स्वभावापरित्यागात्, परित्यागे वा कथं नित्यः स्यात् । अदुःखावस्थोत्पादहेतुत्वाद्यदि मुक्तस्तदा विमुक्त एव भवेन्न कदाचिदपि बद्धः स्यात्तदा कथं तावत्कल्प्येत आधेयनिबन्धनं बन्धमोक्षत्वमिति ।

यदि चैतन्यादिलक्षणत्वेनोत्पादसामर्थ्येन वा कर्ता स्यात्तदा कर्ता एव सदा भवेत्कथ तावद्भोक्ता? अथ सुखाद्युत्पादहेतुत्वेन यदि भोक्ता स्यात्तदा भोक्तैव भवेत्कथं तावत्कर्ता? किञ्च कापिलपरिकल्पितस्य (अत्मनः) (१२०) सुखादिभिराकाशवन्निर्विकारत्वेन नैव खलु युज्यते भोक्तृत्वम्, अतिप्रसङ्गात् । सति वा विकारे नित्यताहानिः । न खलु हेतुमात्रतया कर्ता वा भोक्ता वा, अतिप्रसङ्गात् । तथैव स्मृत्यादिष्वपि नाश्रयित्वमुपयुज्यत इति योज्यं ।

तस्मान्नैरात्म्यवादिन्येव पक्षे बन्धोमोक्षादिव्यवस्था युक्तिमती । कार्यकारणवैशिष्टयमात्रेण तस्या व्यवस्थाया प्रभावितत्वात् । स च कार्यकारणभावस्तावदनित्येष्वेव सम्भवति, न खलु नित्येषु । तेषु नास्ति कस्यचिदपि कार्यस्य क्रमेणोत्पादसामर्थ्यम्, यथोक्तं प्राक् । न चापि युगपद्, तथाविधफलोत्पादसमर्थस्वभावानुगमे फलोत्पादाभावस्तावन्न युज्यते प्राग्वत् । अननुगमे च प्राक्स्वभावताहानिः । क्रमयौगपद्याभ्यां व्यतिरिक्तो नास्त्येव कश्चिदाकारान्तरः, यः स्यादर्थक्रियायां प्रभुविष्णुः, परस्परपरिहारस्थितलक्षणत्वात्तयोः । अत एव यावन्तः परपरिकल्पिता आकाशादयोऽक्षणिकाभावास्ते सर्वे अर्थक्रियासामर्थ्यहितत्वादभावव्यवहारविषया उच्यन्ते परमविचक्षणैर्बौद्धैरिति । शशविषाणादावपि अभावव्यवहारप्रज्ञप्तिः अर्थक्रियायां सामर्थ्याभावमात्रनिबन्धनैव, एअतद्बलेनार्थक्रियासमर्थविषयिका खलु भावव्यहारप्रज्ञप्तिः, परस्परपरिहारस्थितलक्षणत्वाद्भावाभावयोः ।

एवंविधे सर्वसामर्थ्यशून्ये शशविषाणाद्यविशेषेऽपिऽभावःऽ इति नाम व्यवहारे सति नास्ति नाम्नि विवादः । तथापि अर्थक्रियार्थिनो हि प्रेक्षावन्तः (१२१) तथाविधानुपलम्भस्वभावे वन्ध्यापुत्राद्यविशेषे च भावव्यवहारो न युज्यत इत्याहुः । अत एव नासिद्धो हेतुः । न चानैकान्तिकः, आकाशादिष्वपि कर्तृत्वप्रसङ्गात् । सपक्षे सत्त्वान्न च विरुद्धः । तस्मादात्मनो लक्षणान्तराभावाद्बन्ध्यापुत्रसदृश एव । विनश्वरत्वे सति स्कन्धान्तर्गता एव पुद्गलाः प्रसज्येरन्, सर्वसंस्कृतानां स्कन्धसंगृहीतत्वात् । अथाविनश्वरत्वे तावत्स्कन्धान्तर्गतधर्मविसदृशत्वादर्थान्तरा एव ते भवेयुरिति दोषोऽयमुक्तपूर्व एव । अतो नास्ति कश्चिदनिर्वचनीयो भाव इति । अतःऽसर्वे धर्मा निरात्मानःऽ इति भगवतः सिंहनादः समस्ततैर्थिककुञ्जरवृन्दानां भीकरः, अनवमर्दनीयत्वात् । अलमतिविस्तरेण ।

२. पारमितायोग-स्थानं ः

पारमितायोगमधिकृत्याह- अपि तु खलु पुनः इत्यादि । एतच्च पदद्वयं सामान्यविशेषस्वभावात्मकं द्रष्टव्यं । दानं दातव्यं न तुवस्तुप्रतिष्ठितेन बोधिसत्त्वेनेत्यर्थः । दानं इत्यनेन त्रिविधदानमधिकृत्य षट्पारमिता दर्शिताः न तु दानमात्रं । तत्रामिषदानेन दानपारमिता निर्दिष्टा, अभयदानेन तावद्शील-क्षान्तिपारमिते, धर्मदानेन तु वीर्य-ध्यान-प्रज्ञापारमिताः । वीर्याभावे धर्मादान-प्रवचनयोः परिखिन्नत्वान्न

धर्मं देशयेत् । ध्यानाभावे श्रद्धातिरेककर्माभिलषतया संक्लिष्टा भवेद्देशना । प्रज्ञायाश्चाभावे स तद्विपरीततया धर्मं देशयेत् । तस्मात्त्रयाभावे न सिध्यति धर्मदानं । वीर्यं सर्वत्रगमित्यपरे ।

दानं दातव्यं इत्यनेन षट्सु पारमितासु छन्द-प्रणिधानाभ्यां कथं स्थातव्यमिति निर्दिष्टं । न वस्तुप्रतिष्ठितेन इत्यादिनात्र योगसमापत्त्या (१२२) कथं प्रतिपत्तव्यमित्यावेदितं । एवं हि बोधिसत्त्वेन दानं दातव्यं इत्यादिना विक्षेपं निगृह्य कथं चित्तं प्रग्रहीतव्यमित्येतन्निर्दिष्टं । तत्र न वस्तुप्रतिष्ठितेनेति प्रज्ञापारमितायां योगस्य याथावत्त्वं तावन्निर्दिष्टं ।

तत्र देय-दायक-प्रतिग्राहकादिवस्तुषु यत्तत्त्वतोऽभिनिवेशनं तत्प्रतिष्ठानं । यदि बोधिसत्त्वः वस्तुन्यभिनिविश्य पारमितायां युञ्जीत, मिथ्यायोगोभवेत्, परमार्थतः कस्यचिदप्यभिनिवेश्यवस्तुनः सर्वथाभावेन विपरीताभिनिवेशात्, तस्साधकबाधकप्रमाणाभावभावतश्च ।

तथा हि- परैः परमार्थतः इष्टा विज्ञानव्यतिरिक्ता अर्थास्तावान्न प्रत्यक्षसिद्धाः, अर्थान्तरेण ज्ञानेन ग्रहणायोगात् । अर्थे सति साकारेण निराकारेण अन्याकारेण वा ज्ञानेन ग्रहणमिति त्रयः पक्षाः । तत्र तावन्न साकारेण चित्रवर्णादिदर्शनकाले एकज्ञानाभिन्नत्वादाकारणामप्येकत्वं प्रसज्येत, अथवा आकारभिन्नत्वादाकारवज्ज्ञानस्याप्यनेकात्मकत्वं प्रसज्येत ।

अनेकत्वं तावन्न युज्यत एव, एकैकपरमाणुग्राह्यज्ञानानुभवाभावान्न सिध्यति तावज्ज्ञानस्यैकत्वम्, तदसिद्धावनेकत्वमपि खल्वसिद्धम्, एकैकसहंतिस्वरूपत्वादनेकस्य । चित्राकारव्यवस्थापनायै अनेकज्ञानोत्पादपरिकल्पनयापि ज्ञानस्य विषयं व्याप्य स्थितत्वाद्ग्राहकज्ञानानामुत्पादोऽपि न सम्भवति, अमूर्तत्वाज्ज्ञानानां ।

अन्यच्च, सारूप्यं तावदेकदेशेन भवेत्सर्वात्मना वा । तत्र न तावत्सर्वात्मना- अर्थज्ज्ञानस्यापि जडस्वभावप्रसङ्गात् । न चैकदेशेन- एकस्य तावन्निरवयवत्वाद् । व्यावृत्तिभेदेनांशोपचारेऽपि वस्त्वादिसारुप्यधर्माणां सर्वत्र (१२३) विद्यमानत्वात्सर्वेण सर्वमवगम्येत । अथ तदुत्पन्नं तत्सारूप्यं चेत्येतद्द्वयेन वेदयतीति अर्थसारुप्यस्य समनस्तरप्रत्ययस्यापि ग्राहकत्वप्रसङ्गः ।

सत्यपि सारूप्ये परमार्थतः बाह्यार्थो न प्रत्यक्षसिद्धः, नीलाकारात्मनो ज्ञानस्य स्वसंविदितत्वात् । यतो हि प्रत्यक्षैव नीलादिविज्ञप्तिर्नापरा । यत्तद्विज्ञानं तदेवार्थग्राहकमिति चेत्? भवतु नाम प्रज्ञप्तितः, न तु परमार्थतस्तद्वेदनम्, आत्माकारस्य स्वसंविदितत्वात्, अत्यन्तपरोक्षत्वादर्थानां कथं तदाकारं ज्ञानं भवेदिति । स्वाकाराधानेन तावदुत्पादको हेतुर्नैव नियमेन सिध्यति, व्यभिचारात् ।

परमाणवः खलु नैव स्थूलप्रतीतिविषयः, सूक्ष्मत्वात्तेषां । न च संहिताः, तेभ्योऽनर्थान्तरत्वात्विकल्पविषयाणां असत्त्वाच्च । संहतार्थान्तरत्वे पृथक्प्रतिभासः स्यात् । आवृतानावृतयोश्च विरोधान्नैव तावद्युज्यत एकत्वं । अनेकत्वे संघातस्य परमाणुरेव स स्यान्न त्वर्थान्तरः ।

न च तावन्निराकारपक्षः- नीलादिष्वकिञ्चित्करत्वात्तस्य । भावमात्रेण वेदने सति सर्वैः सर्ववेदनप्रसङ्गः, अविशिष्टत्वात्सर्वस्य । अतो नीलसंवेदनमिदम्, न पीतमिति व्यवस्था न स्यात्, व्यवस्थायाः कस्यापि हेतुविशेषस्याभावात् । विशेषस्य कस्यचिदभ्युपगमे स एव तावत्साकारत्वाभ्युपगमः । प्रतीतिस्वभावमात्रे तावद्विशेषाभावाज्ज्ञानात्मनि नाकारातिरिक्तं भेदकमन्यत्स्यात् ।

नैवान्याकारपक्षः, अतिप्रसङ्गात् । एवं हि सति रूपविषयकमाकारविज्ञानं तावत्परीक्षामर्हति, तथा हि- न तावत्प्रत्यक्षतोऽर्थः सिध्यति, नानुमानादपि । अप्रत्यक्षस्यार्थस्य ज्ञानस्य च केनापि हेतुना सम्बन्धासिद्धेः । फलज्ञानाद्भिन्नस्य कारणमात्रत्वानुमाने नेष्टसिद्धिः, इतरस्य समनन्तरप्रत्ययस्य विद्यमानत्वात् । इतरत्प्रमाणं नास्ति, अतो तावन्नैव सिध्यति बाह्योऽर्थः ।

न तावत्परमार्थतः ज्ञानस्वभावता प्रत्यक्षेण सिध्यति, अद्धैतस्वभावताया असंविदितत्वात्, अन्यथा न कोऽपि तत्त्वद्रष्टा स्यात् । नानुमानेनापि एवंविधेनाकारेण कस्यापि हेतोः सम्बन्धस्यासिद्धेः ।

नन्वेवं कथं संक्लेशव्यवदाने स्यातामिति चेत्? न, त्वन्मते ताभ्यां सह तस्य कस्यचिदपि सम्बन्धस्यासिद्धत्वात् । तयोः परमार्थतः क्वचिदपि वस्तुनि (१२४) सम्बन्धासिद्धेः । न तावत्तदुत्पत्तिलक्षणसम्बन्धः, सर्वथा परोक्षत्वात्तस्य । परोक्षेण सह सम्बन्धस्तु न केनाप्यर्वाग्दर्शिना ग्रहीतुं शक्यते । अविद्यादीनामविचाररमणीयत्वेऽपि संक्लेशमूलत्वे नास्ति विरोधः, अविद्यादौ विचारेण तृष्णानिवृत्तौ व्यवदानम्, ततो विपक्षभूतलक्षणं अविचारैकरमणीयमुपपद्यते, तदा परमार्थतो वस्त्वभावेन कथं तयोरप्यभावप्रसङ्गः । ये एतयोरेकान्तेन निर्हेतुकत्वमभ्युपगच्छन्ति, तेष्वेवायं प्रसङ्गः, न तु संवृतितः प्रतीत्यसमुत्पादवादिषु ।

अत एव परमार्थतः भावस्वभावसाधकं किञ्चिदपि प्रमाणं नास्ति, अस्त्येव च बाधकं । इत्येवं तावत्-यदेकानेकस्वभावविगतं तत्परमार्थतो निःस्वभावम्, गगनारविन्दवत् । परैरिष्टाः सर्वे ज्ञानज्ञेयात्मकाः भावाकाराः, एकानेकस्वभावशून्या इत्यतो व्यापकानुपलब्धिः, एकानेकाभ्यां व्याप्तत्वात्स्वभावस्य । द्वयमेतत्तत्र नास्ति । एवं तावद्रूपाद्यायतनानां बाह्यवस्तूनां नैकत्वम्, आवृत्यनावृत्योर्विरुद्धर्मयोस्तत्रोपलब्धे । अपि च, विरुद्धधर्मसंसर्गेऽप्येकत्वे विश्वमप्येकद्रव्यं स्यात् । ततो युगपदुत्पत्तिविनाशौ स्यातां ।

नानेकत्वमपि, तथा हि- अनेकस्मिन्विभज्यमाने सति विभक्ताः परमाणव एव स्युः ततश्च पौर्वापर्यावस्थानं न स्यान्निरवयवत्वात्परमाणूनाम्, चित्तचैतसिकवत् । ततो दिशं व्याप्य अवस्थिता न प्रतिभासेरन् । अत एव दिग्भागभेदोऽभ्युपगन्तव्य एव । सति चाभ्युपगमे कथं नाम भवेदेकत्वं । अतः सिद्ध एव तावदेकानेकस्वभावविरहत्वं बाह्यार्थानां ।

नीलादिप्रतिभासिनो ज्ञानस्यापि नैकस्वभावत्वम्, चित्राकारग्रहितयावभास्यमानत्वात्, भिन्नसन्तानवर्त्यनेकविज्ञानक्षणवत् । यथासंख्यं अनेकविज्ञानानि युगपत्प्रवर्तन्त इत्यपि वक्तुं न युज्यते निरवयवानाममूर्तानां खलु पौर्वापर्यावस्थितेरयुक्तत्वात् । तथावस्थानाभावे न तथावभासः ।

अथ स्यात्- विज्ञानं त्वेकमेव, मिथ्याकाराणां तत्रावभास्यमानत्वान्न नानात्वदोष इति चेत्? सति चैवं कथं ते तत्र भासेरन्मृषाः । अवभास इति प्रकाशात्मक उच्यते । तस्य ज्ञानगतधर्मत्वे सति मिथ्याकाराणां शशविषाणादिवदत्यन्ताभ्यावः स्यादिति कथमवभासेरन्निति ।

ततः प्रकाशात्मकाकारेभ्यः मृषात्वेनाभ्युपेतेभ्यः कस्तावदन्यः ज्ञानस्वभावः सद्भूतस्तेऽवशिष्यते, प्रकाशात्मलक्षणत्वाद्विज्ञानस्य । नीलादयोऽपि प्रकाशात्मकाः स्वभावेनावभास्यमानत्वात् । नीलादीनां स्वस्वभावाद्भिन्नं यदन्यत्प्रकाशरूपमिति सद्भूतं किमपि नाति, अन्यव्यवच्छेदापेक्षया विशेषे प्रायशो व्यवहारात् ।

विशेषाणां मिथ्यात्वे सर्वेषां मिथ्यात्वमतिविस्पष्टं स्यात् । निराकारस्य (मिथ्याकाररस्य) सत्याकारात्मनि (साकारात्मनि) ज्ञाने कथं नियमेनाअभासः स्यात्, तयोस्तावत्तादात्म्यलक्षणो वा तदुत्पत्तिलक्षणो वा सम्बन्ध एव नास्ति । सम्बन्धाभावे न खलु युज्यतेऽवभासनम्, अतिप्रसङ्गात् । अत एव नास्ति तावदसिद्धो हेतुः । भावानामन्याकाराभावान्नाप्यैकान्तिकः । न चापि विरुद्ध, सपक्षे सत्त्वात् । अत एव यथा यथार्थाश्चित्यन्ते विशीर्यन्ते तथा तथा । तथा चोक्तम्-

(१२६)
वस्तुस्वभावचिन्तायां यथा न सत्स्वभावता ।
एकानेकस्वभावोऽपि न तेषां विद्यते तथा ।।

अपि चार्यलङ्कावतारे भगवतोक्तं ः

यथा हि दर्पणे रूपमेकत्वान्यत्ववर्जितं ।
दृश्यते न च तन्नास्ति तथा चोत्पादलक्षणं ।
बुद्ध्या विवेच्यमानानां स्वभावो नावधार्यते ।
तस्मादनभिलाप्यास्ते निःस्वभावाश्च देशिताः ।।

तथा चार्यमाधिराजसूत्रेऽपि

यथैव आर्द्रं कदलीयस्कन्धं सारार्थिकः पुरुषु विपाटयेत् ।
बहिर्वा अध्यात्म न सारमस्ति तथोपमान्जानथ सर्वधर्मान् ।।

तस्मात्सर्वभावानां मायावदविचाररमणीयत्वादनभिनिवेशेन दानं दातव्यम्, न तु वस्तुप्रतिष्ठितेन इत्ययमर्थोऽत्र युक्तिसङ्गतः । एवं दानादिषु यथा योगस्तथा आदर्शितः, नान्यत्र ।

यदि परमार्थत कस्यचिदपि वस्तुनो भावाभावाद्वस्तुप्रतिष्ठितेन दानं न दातव्यम्, तदा अवस्त्वभिनिवेशेन तु दानस्य कथैव का, अत एव न (१२७) क्वचिप्रतिष्ठितेन इत्युक्तं । बोधिसत्त्वेनाभावविकल्पोऽपि प्रहातव्यः, भावग्राहाभावे सति तस्याप्यभावात् । संवृतौ तावद्देयदायकादयो भवन्त्येव । ततो वस्तुनोऽभावेऽपि तावदभिनिवेशो न युज्यत एवेत्यभिप्रायः । न रूपप्रतिष्ठितेन इत्यादिना बोधिसत्त्वेन न क्वचित्प्रतिष्ठितेन दानं दातव्यमित्येव विस्तरेणाभिहितं ।

धर्मः इत्यनेन शब्देन धर्मायतनं परिगृह्यते, आयतनेन प्रपञ्चः अभिव्यज्यते, अतश्चक्षुरादीनि आध्यात्मिकायतनानि नोच्यन्ते । अनुत्पादादयो विकल्पा अपि न करणीया इति निदर्शनार्थ सुभूते, यथा इत्याद्युक्तं । निमित्तं तु वस्तुस्वलक्षणं लिङ्गं वानुत्पादादि, तस्योद्ग्रहणं संज्ञा । तत्र निर्विकल्पन्तु अप्रतिष्ठितं । अत एव न क्वचित्प्रतिष्ठितेन इति निर्दिष्टं । अथवा समग्रेणैतेन गाम्भीर्यमस्य व्यपदिष्टम्, अध्यारोपावादान्तौ प्रतिषिद्धौ चेति ।

अस्मिन्दर्शने उपलम्भकानां ज्ञानपुण्यसम्भारपारिपूरोयोग्यत्वं प्रतिषिध्यते, एवं पूजानुग्रहकाम्यया यद्दीयते, तेनातितरां सम्प्रसादो जन्यते, न तु देय-दायक-प्रतिग्राहकानुपलम्भे प्रतिष्ठितत्वेन, एवं ह्यभावः, देयाद्यनुपलब्धत्वाद्विषयस्याभावाच्च । प्रथमपक्षे केनापि कस्यचिदपि देयस्याभावात्पुण्याभावः प्रसज्यते, (द्वितीयपक्षे तावत्) बोधिसत्त्वैः यो हि सत्त्वार्थं श्रम आस्थितः, सोऽपि व्यर्थः स्यात्सत्त्वाभावात् । अत एव नाभावमात्रं ।

(१२८)
भगवता देयादिवस्तूनां दृष्टत्वात्, न च विषयस्याप्यभावः । अन्यथा कथं भगवतार्थिजनेभ्यः पुत्रादयः प्रदत्ता इति सर्वाण्येतानि चोद्यानि मनसि निधाय तत्कस्य हेतोः? इति पृच्छायां यः सुभूते, बोधिसत्त्वः इत्यादिना विसर्जितं ।

अयमभिप्रायः- सम्यग्दृटिविहितानि दानादीनि सुविशुद्धतया विशिष्टेष्टफलानि अभिनिर्वर्तयन्ति, न विपरीततया समुद्भूतानि, मिथ्यादृष्टिप्रवर्तितशीलाङ्गादिवत् । देयादिवस्तूनि यथोक्तन्यायेन कथञ्चिदप्यसत्त्वात्मिथ्योपलब्धान्येव, मरीचिकासु उदकोपलम्भवत् । तस्मात्तदुद्भूतः सर्वपारमिताइधिस्तावदात्मात्मीयविपर्यसोद्गतसोद्गतदानादिवदविशुद्धहेतोः सम्भूतत्वात्क्षीणबलः, देयाद्युपलक्षणप्राप्तानुपलम्भस्तु भूर्तार्थगोचरत्वादविपर्यस्तः, मरिचिकायामुदकानुपलब्धिवत् । तस्मादुपचितहेतुसम्भूतदानादीनि बृहत्फलानि, पुष्टबीजाभिनिर्वृत्ताङ्कुरादिवत् । अत एव अनुपलम्भप्रतिष्ठितानि दानादीनि सम्यग्दृष्टिसम्भूतानीति विपश्चित्सु प्रसादातिशयं जनयन्ति, नान्येषु ।

ततश्च दानादिष्वप्रवृत्ततया पुण्याभावो देयादीनां चैकान्ताभावो नेष्यते, संवृतिसत्त्वाभ्युपगमात् । असमाहितावस्थायां मायावदुपलम्भान्न सर्वत्रानुपलम्भः । तदा चाधिमुक्तितः प्रादुर्भावादेवानुपलम्भो व्यवस्थाप्यते । समाहितावस्थायां उपलम्भस्यात्यन्ताभावमात्रम्, तदा दानादिषु प्रवृत्तिर्नाभ्युपेयते

प्रयोगावस्थायां (१२९) व्युत्थितावस्थायां वा क्रिययोपालम्भो न युज्यते । अतो महाफलत्वाय पारमितायोगस्यैदार्यमभिधीयते । संवृतौ कार्यकारणभावस्योपदर्शनादपवादान्तोऽपि निषिध्यते ।

३. रूपकायाप्तिकामता-स्थानं ः

त्रिधा पुण्यमाकाशसमं भवति- सर्वत्रगोदाराक्षयत्वैः । लौकिकलोकोत्तरपुण्यप्रसवनात्सर्वत्रगत्वम्, लौकिकं तावत्पुण्यमसमाहितावस्थायां प्रसूयते, लोकोत्तरं तु समाहितावस्थायामेव । विशिष्ट-विशिष्टतरगमनादुदारत्वं । यावत्संसारमपर्यादानादक्षयत्वं । तदभावान्न रूपप्रतिष्ठितेन दानं दातव्यमिति बोधिसत्त्वः तथागतरूपकायाप्तिकामनया दानादिषु कथं प्रवर्तेतेति चेदिति चोद्यमाशङ्कय तत्किं मन्यसे सुभूते इत्यादिना रूपकायाप्तिकामता स्थानं निर्दिष्टं । अर्थतोऽत्र रूपकाये तथागतत्वाभिमानलक्षणो विपक्षोऽपाक्रियते । लक्षणसम्पदा इति निमित्तमात्राभिधानेन तथागतस्य निखिलो रूपकायः लक्षणानुव्यञ्जनैरलङ्कृतः परिदीपितः ।

तत्र लक्षणानि तावत्चक्राङ्कहस्तपादतादीनि द्वात्रिंशत्पदबाहुल्यभिया नोल्लिख्यन्ते, सूत्रेषु यथोक्तानी तथैवावधेयानि । स्थानस्थोत्तप्तपूर्णत्वेन निष्पत्तिः । (१३०) अशीतिरनुव्यञ्चनानि ताम्रवर्णनखादीनि, यथासूत्रं ज्ञातव्यानि । तानि लक्षनादीन्यपि मायानिर्मितबुद्धलक्षणवन्मिथ्यैव । अत एव तथाविधे रूपकाये छन्दप्रणिधानाभ्यां स्थातव्यमिति निर्देशः ।

अथेमानि लक्षणानि परमाणुसञ्चयस्वभावानि वा तदारब्धावयविरूपाणि वा भवेयुरिति? न तावत्प्रथमः पक्ष, परमाणूनां पूर्वमेव निरस्तत्वात् । नापि द्वितीयः, असति चारम्भके तदारब्धावयविनोऽप्यभावात्, पूर्वोक्तावरणादिविरुद्धर्मोपलम्भाच्च । तदुद्दिष्टेनाभिहितोऽभिप्रायः । एतद्विचिन्त्य सुभूतिराह नो हीदं इति व्यक्तीकृतं ।

यदि लक्षणानि मृषा भवेयुस्तर्हि कथं भगवता तत्तत्सूत्रेषु लक्षणानि समुपदिष्टानीति चिन्तयन्तत्कस्य हेतोः इति पृष्ट्वैवं सैवालक्षणसम्पदित्याह । सा लक्षणसम्पत्तावन्नोक्ता परमार्थतः । मायानिर्मितबुद्धवदित्यनेन मृषास्वभावत्वमात्रमुक्तमित्यर्थः ।

आर्यसुभूतिनोक्तमेवार्थ परिपूरयितुं भगवता यावतित्याद्याह । यावल्लक्षणसम्पदिति परमार्थतो यावल्लक्षनसम्पत्स्वभिनिवेशः, तावन्मिथ्याभिनिवेश एवेत्यर्थः, यथोक्तमेव पूर्व । यावल्लक्षणसम्पदिति तद्वीपरीततया अभिहितेत्यवगन्तव्यं । एतेन योगसमापत्त्या कथं प्रतिपत्तव्यमिति तद्देशितं । कथमन्तद्वयं परिवर्ज्य चित्तं प्रग्रहीतव्यमिति तन्निर्दिष्टं । एवं इति मायानिर्मितबुद्धवल्लक्षणतस्तथागतो द्रष्टव्यः । अनेनापवादान्तो निराक्रियते, संवृतौ भगवतो रूपकायस्पाप्रत्याख्यानात् । अलक्षणं तावत्परमार्थे द्रष्टव्यम्, कस्यापि लक्षणस्यासिद्धत्वात् । अनेन तावत्समारोपान्तो निराक्रियते । तथागतस्य रूपकायावाप्तये प्रणिधानैस्त्वौदार्यमुक्तं । तदनुपलम्भतया च गाम्भीर्यं । रूपकायाप्तिकामतास्थानं तावदुक्तं ।

४. धर्मकायाप्तिकामतास्थानं ः (अ) प्रवचनधर्मकायः

द्विविधः खलु धर्मकायः- प्रवचनधर्मकायः, अधिगमधर्मकायश्च । अधिगमधर्मकायोऽपि द्विविधः- ज्ञानहेतुकः पुण्यहेतुकश्च । तत्रानागते पुरुषेषु पञ्चकषायाणामाधिक्यादेवंविधधर्मरत्नस्य अत्यन्तगम्भीरोदारफलत्वात्प्रवचनधर्मकायेऽनाप्तत्वाशङ्कया अस्ति इति पृष्टवान् । अस्ति इति पदं तु केचित्सत्त्वाः ये इमेष्वेवंरूपेषु सूत्रान्तपदेषु भाष्यमाणेषु भूतसंज्ञामुत्पादयिष्यन्ति इत्यर्थपदेन योज्यं । पश्चिमायां पञ्चशत्यां इत्यत्र शतानां पञ्चकं पञ्चशती, भगवतां शासनं पञ्चशतवर्षाणि स्थास्यतीति प्रसिद्धेः । अत एव पश्चिमेति विशेषणं विहितं । तस्मिन्काले पञ्चकषायाणामधिमात्रता भवति ।

सद्धर्मविप्रलोपस्तावदधिमुक्ति-वाचन-स्वाध्याय-उपदेश-आख्यान-श्रवण-चिन्तादीनां हानिः । एवं इति गम्भीरोदारार्थः । सूत्रान्तपदेषु इति सूत्रान्तदेशनावाचः, ताभिरर्थस्य प्रतिपाद्यमानत्वात्ज्ञाप्यमानत्वाच्च । अनेन निमित्तमात्राभिधानेन समस्तप्रवचनधर्मकायस्तावत्परिदीप्यते । अथवा सूत्रान्तपदेषु इत्यभिधियमानार्थकेषु । अस्मिन्कथनेऽएवम्ऽ इत्यनेन तावद्गम्भीरौदार्ये योजनीये । भाष्यमाणेषु इति प्रथमतया अभिधियमानेषु । द्वीतीयतया (१३२) अर्थप्रतिपादकेष्वित्यर्थः । अर्थतोऽविपर्ययस्तसंज्ञैवात्र भूतसंज्ञेत्यभिधीयते न तु शब्दाभिनिवेशमात्रम्ऽअयं भूतःऽ इति संज्ञा । अनेन तावदर्थसिद्धौ अभूतसंज्ञा निराक्रियते ।

सर्वत्राप्रतिहतज्ञानेन तान्भाविनः (सत्त्वान्) प्रत्यक्षवद्दृष्टवा भगवान्सूभूतिसशयं परिहर्तुं भविष्यन्ति इत्याह । महासत्त्वाः इति तेषां बोधिसत्त्वगुणानां सम्प्रदर्शनार्थमुक्तं । तेऽपि यथा प्रतिपन्नाः, यादृशेन च हेतुना सम्प्रतिपन्नाः, याद्दृशेन कल्याणमित्रेण परिगृहीताः, यथा वा भूतसंज्ञया संज्ञितास्तान्भगवान्परिदीपितंवान् । शीलवन्तः गुणवन्तः प्रज्ञावन्तश्च इत्यनेन तु क्रमशोऽधिशीलाधिचित्ताधिप्रज्ञाश्चेति शिक्षात्रयप्रतिप्रत्तिसमन्विताः निर्दिष्टाः । शीलप्रज्ञयोश्च पृथगुक्तत्वाद्गुणस्तावदत्र ध्यानजो ग्राह्यः, गोबलीवर्दन्यायेनेति ।

क्लेशवति पश्चिमकाले तु कथं तथाविधशीलादिगुणवन्तो भविष्यन्तीति चिन्तयित्वा सूभूते इत्याद्याह । पर्युपासिताः इति चीवर-पिण्डपातादिभिः पर्यूपासिताः, छत्रध्वजपताकादिभिश्च पूजिता भविष्यन्ति । अवरोपितकुशलमूलाः तावदववादमनुशासनीं च शिरसादाय शीलादिगुणसम्पद्भ्यः प्रयत्नवन्तो द्रष्टव्याः । तेषां ततोऽपि बहुतरं पुण्यमभिधातुं अनेकबुद्धशतसहस्रः इत्युक्तं । (१३३) अनेन तेषां हेतुसिद्धिः संदर्शिता । ज्ञातास्ते तथागतेन इति नामान्याशयाश्च । दृष्टास्ते तथागतेन इति कायाः ।

अनेन तावत्कल्याणमित्रपरिगृहीता इओति दर्शितं । तच्च सम्प्रस्थितानां प्रोत्साहनार्थम्, विप्रस्थितानां ह्रीसञ्जननार्थमाह । अन्यथा सर्वेषां ज्ञानात्ज्ञानात्सर्वज्ञो भगवानिति देशनया को विशेषो दर्शितो भवेत्, अथवा तत्तेषां भव्यत्वं यत्तत्प्रमुखं कृत्वा देशना प्रवर्तितेत्यवगन्तव्यं । भव्या ज्ञाता इति वाक्यशेषः । अतस्तेषामशेषं पुण्यस्कन्धसङ्ग्रहं दर्शयितुं सर्वे ते सत्त्वाः इत्याह । प्रसविष्यन्ति इति पुण्योत्पादकालः, प्रतिग्रहीष्यन्ति इति निरोधकाले तद्वासनाः परिग्रहीष्यन्ति ।

एभिः सर्वैरभूतसंज्ञां निराकृत्य भूतसंग्योत्पादने छन्दप्रणिधानाभ्यां स्थातव्यमित्यादर्शितं तथा स्थानस्यास्यौदार्यमपि परिदीपितं । तत्कस्य हेतोः? ते अनेकबुद्धशतसहस्रपर्युपासिताः कथं ज्ञास्यन्त इति ज्ञापकहेतौ परिपृष्टेऽत्र तेषां बोधिसत्त्वानां महासत्त्वानां इत्याद्याह । अनेन तवत्योगसमापत्तौ कथं प्रतित्तव्यमित्येतत्प्रकाशितम्, गम्भीरता चाप्यभिहिता ।

अहमित्यात्मग्रहणं आत्मसंज्ञा सा । ममेति ग्रहणं सत्त्वसंज्ञा, तस्यैवात्मन आ स्थितिं परिग्रहः जीवसंज्ञा, पुनः पुनः गतिषु गमनादानं पुद्गलसंज्ञा । यदि नास्ति आत्मादिसंज्ञा तर्हि किं श्रावकादिवदस्ति रूपादिधर्मसंज्ञा? इति चिन्तायां न धर्मसंज्ञा इत्युक्तं । परमार्थतः कस्यचिदपि धर्मस्याभावादित्यभिप्रायः ।

(१३४)
अथ किं उच्छेदवादिनामिव अभावसंज्ञा? इति चिन्तायां एवं नाधर्मसंज्ञा प्रवर्तते इत्युक्तं । संवृतौ अविचाररमणीयतया धर्माणां सद्भावात्संवृतिपथस्थितेभ्यस्तावदधर्मसंज्ञा नैव युक्तिमती, न तु परमार्थज्ञानस्थितेभ्यः । तन्निषेधान्न कश्चिद्धर्म उपलभ्यते यत्राधर्मसंज्ञा प्रवर्तेत, धर्माग्रहणे तदभावात् । विषयाभावनिषेधस्तु न कुत्रापि सम्भवति, तद्यथा सत्येऽपि विज्ञप्तिमात्रे विज्ञप्तिमात्रतेयमिति विकल्पयन्न विज्ञप्तिमात्रतायां स्थितः, एवमेव सत्येऽप्यधर्मेऽधर्मबोधस्य तत्रावस्थानासम्भवात्सर्वं समानं ।

यद्यात्मादीनामसत्त्वं तदा तत्र तत्संज्ञाया अप्रवृतौ सत्यांऽआत्मैव रूपमिदम्ऽ इत्यादिकं नाममात्रमिति नामाभिनिवेशसंज्ञा तेषां भवेदिति मत्वा संज्ञापि इत्युक्तं । नाम्नस्तावद्रूपस्कन्धान्तर्भूतत्वाद्रूपादिवद्मिथ्यात्वमेव, विप्रयुक्तमपि प्रज्ञप्तिमात्रमिति । तस्मात्संज्ञापि मिथ्याभिनिवेश एवेत्यभिप्रायः ।

यद्येवं तर्हि तस्यामवस्थायां सर्वसंज्ञाविगमाद्मृत-निरोधसमापन्नपुद्गलवद्योगिनोऽभाव एव स्यादिति नापि..... नाअंज्ञा प्रवर्तते इत्युक्तं । येन ते योगिनो भवन्ति, तच्च योगिज्ञानं तथ्यसंवृतिस्वभावमिति । व्युत्थाने शुद्धलौकिकज्ञानमुद्भवतीति, अन्यथा अहेतुकमेव तद्भवेत् । यद्योगिज्ञानं संवृतिस्वभावं तत्केनावगम्यत इति चेत्? तेनैव हेतुना । यथा प्रत्यात्मवेद्यतया पुद्गलनैरात्मावबोधेन आत्मस्थितं पुद्गलनैरात्म्यमधिगम्यते, अत्रापि तत्तुल्यं । ज्ञानं संवित्तिश्च न संवृतौ नाभ्युपगम्येते । योगिना स्वलक्षणप्रत्यभिमुखीकरणात्तत्रस्थं नैरात्म्यं नोपलभ्यते, तदानीमतीतादेस्तावदसंनिहितत्वादनन्तत्वाच्च ।

(१३५)
कथ तर्हि? निःस्वभावताविचारेण तद्गोचरीभूतानां सर्वधर्माणां सामान्येन नैरात्मसङ्ग्रहात्या खलु व्यवस्था सैव युगपदुलम्भनं । तेषां तज्ज्ञानमपि परमार्थतोऽविषय एव, (तथापि) सत्यस्वप्नज्ञानवदविसंवादकत्वेन प्रामाण्यं व्यवस्थाप्यते । सामान्येन तत्र तदात्मभावोऽपि संगृह्यते, न तत्र पृथक्तदालम्बकत्वं ।

तस्मात्सति नैरात्म्यद्वयावबोधे तेषामनेकशतसहस्रबुद्धानां पर्युपासनं प्रतीयते । बुद्धानामपर्युपासनया तावन्न सम्भवति तदवबोधः तैर्थिकवत् । स तु संसारे न उचितो भवतीत्यभिप्रायः । अनया योगसमापत्त्या कथं प्रतिपत्तव्यं कीदृश्या च भूतसंज्ञया तत्संज्ञातव्यमिति संदर्शितं तद्गाम्भीर्यमित्यपि च परिदीपितं ।

आत्मादीनामसत्त्वे तेषामात्मादिसंज्ञाया अभावात्पदसमुदायादिभिः आत्मत्व सूक्तं दुरक्तं च लक्षणं धर्माधर्मसंज्ञं किं तेषु नियमेन न प्रवर्तते? नैवम्, यदि बोधिसत्त्वाना न भवेत्तत्र संज्ञा, (तर्हि) अयुक्तयुपपन्नतीर्थकरधर्मान्परित्यज्य भगवद्देशितेषु धर्मेषु तदधिगमाय कथं छन्द उत्पादनीय इत्याशङ्कायां तत्कस्य हेतोः? इति तत्समाधानाय सचेत्सुभूते इत्याह ।

अयमभिप्रायः- एकानेकस्वभावविचारेण यथा रूपादिलक्षणधर्मा न संविद्यन्ते, तथा देशनाधर्मा अपि । यत्र धर्मसंज्ञा तत्रात्मादिसंज्ञा अपि निश्चयेन नैव प्रहीणा, धर्मनिमित्तग्रहणमूलत्वात्तस्याः । धर्मनिमित्तग्राहकमनसिकारस्य (१३६) तस्या एव मनसिकाररूपत्वात्मैत्रीप्रभृतिषु तत्त्वमनसिकारासद्भावे नात्मदृष्टिः परिहीयते । अत एव एकमेव यानम्, तच्च महायानमित्युक्तं ।

अपि च, बोधिसत्त्वानां सा धर्मसंज्ञा यद्यवश्यमनुत्पन्नदर्शनमार्गः स्यात्तथा सति तेन कथमात्मादिसंज्ञा प्रहीणा स्यात्? दर्शनमार्गप्रहेयत्वात्तस्याः । अतः सर्वमेतत्परीक्ष्य स एव तेषामात्मग्राहो भवेतित्युक्तं । तस्य तद्धेतुत्वात्तदनुशयाप्रहीणत्वाच्चेत्यभिप्रायः । अन्यथा तयोर्भिन्नाकारत्वात्कथं धर्मसंज्ञैव आत्मग्राहः स्यादिति । धर्मास्तावदत्र युक्त्युपपन्नागमलक्षणा एवेष्टाः तद्विपरीता अधर्माः । एवं सति तत्तत्सूत्रेषु कथं भगवता बोधिसत्त्वेभ्यः सद्धर्मः परिग्राहयिष्यते? एवमनुचिन्त्य तत्कस्य हेतोः? इति परिपप्रच्छ । तदर्थं सुभूते इत्याद्याह । नोद्ग्रहीतव्यः वितथमार्गेण विपरीताभिनिवेशक्षणेन नोद्ग्रहीतव्यः, सत्य इति नाभिनिविष्टव्यमिति वाक्यार्थः । अभिप्रेतसिद्ध्यर्थं कोलोपमदेशितस्य लक्षणस्य न ग्रहणनिषेध इत्यभिप्रायः ।

तस्मातित्यादिना स एवार्थः पदान्तरै प्रयुक्तः, यतो हि सर्वो धर्मोऽधर्मश्च सत्य इत्यभिनिवेशस्य विपरीताभिनिवेशत्वाद्, युक्त्योपपन्नो य आगमसमूहः संसारार्णवोत्तरणाय प्रोक्तः कोलोपमः स (यदा) पारं गत्वा निष्प्रयोजनत्वात्परित्याज्यो भवति, किमु (तदा) तेऽयुक्तयोपपन्नास्तैर्थिकानामिवाधर्माः । सप्रयोजनमपि तदालम्बनं मया नानुज्ञातमित्येवमुक्तवान्तथागतः । अन्यथा धर्माधर्मादिकं यदि सत्यस्वभावं स्यात्तदा परमार्थविषयत्वात्तदभिनिवेशस्य संसारपारगतेष्वपि युक्तिसहं (१३७) स्यादिति, किमिति तथागतः तन्निषेधतीति? इति तु संग्रहार्थः । तथा आर्यरत्नकरण्डसूत्रेऽपि भगवता उक्तम्-

"भदन्त सुभूते कोलोपमं धर्मपर्यायजानद्भिर्धर्मा एव प्रहातव्याः, प्रागेवाधर्मा इति । यो हि धर्मः प्रहीयते, सोऽपि नाधर्मः इति ।"

यः सूत्रादिधर्मपर्यायः स कोलोपम उच्यते । धर्मा एव इत्येतदुपलक्षणं । तेन रूपादयो मार्गलक्षणाश्च धर्माः संगृह्यन्ते । अधर्मा इत्यपि उपलक्षणमात्रम्, तेन प्रसिद्धविरुद्धाः अधर्मलक्षणाः परपरिकल्पिता

आत्मादयश्च उपदिष्टास्तेऽपि संगृह्यन्ते । अथवा धर्माधर्माभिधेयाभिधानात्न सर्वसंग्रहे दोषः । अनेन तावद्विक्षेपं नीगृह्य कथं चित्तं प्रग्रहीतव्यमित्येतद्दर्शितं ।

[ब] अधिगमधर्मकायस्थानं ः [१] ज्ञानहेतुधर्मकायः
ननु धर्मादयः सर्वे परमार्थतो मिथ्यास्वभावाः, तदा अभिसम्बुद्धो भूत्वाऽभगवता सर्वे धर्मा देशिताःऽ इति तदपि मृषैव स्यात्, अत एव बोधिसत्त्वैः तथागतज्ञानहेतुमधिगमधर्मकायं प्राप्तुं छन्दो न जनयितव्यः, इत्येतद्विचार्य ज्ञानहेतुधर्मकायावाप्तये छन्दोत्पादनाय तत्किं मन्यसे सुभूते इत्यक्तं ।

अनेनार्थतः परमार्थस्तु अनुत्तरा सम्यक्संबोधिरिति अभिसम्बुद्ध इत्येतयोः (१३८) ग्रहणमपि विपक्षतया परिदीपितम्, तथ्यसंवृतिस्वभावं तु तथागतस्य ज्ञानहेतुं ज्ञानधर्मकायं प्राप्तुं छन्दः प्रणिधानं च प्रदर्शिते । अनुत्तरा सम्यक्सम्बोधिः इत्युपलक्षणमात्रपरिदीपनेन श्रावक-प्रत्येकबुद्धादीनां प्रतिपत्तिभेदेन भिन्नः ज्ञानहेतुकोऽधिगमकायस्तावन्निर्दिश्यते । श्रावकादीनामपि गुणा बोधिसत्त्वेनावगन्तव्या एव, अन्यथा कथं तावत्सर्वज्ञपदलाभः ।

संवृतिस्वभावस्त्वेवम्- सम्बोधिः सम्बोद्धव्यं देशना देशितव्यमित्यादयः सर्वे पर्यायाः । भगवता कं परमार्थाभिप्रायमभिलक्ष्य सर्वं मिथ्यैवेत्युक्तम्, तदुक्ताभिप्रायं संगृह्य आर्यसुभूतिस्थविरः यथाहं भगवतो भाषितस्यार्थमाजानामि इत्येतदवोचत् । यथाहमाजानामित्यभिप्रायविवरणं । कस्मान्नाभिसम्बुद्धः, धर्मदेशना च न स्त इति चिन्तायां तत्कस्य हेतोः? इति । अग्राह्यः इति परमार्थस्तावन्निर्विकल्पज्ञानगोचरोऽपि न भवतीति उक्तपूर्वं । अनभिलाप्यः शब्दाविषयत्वादिति । सर्वे शब्दगोचरास्तावत्समारोपितसामान्यमात्रात्मकाः, सामान्यस्य चाभावरूपत्वात् । इमौ द्वौ (शब्दौ) अभिसम्बुद्धाभावस्य धर्मदेशनाभावस्य च यथाक्रमं हेतुतयाभिहितौ ।

ननु स्युः सर्वे भावा अग्राह्याः अनभिलाप्याः, तथापि स्वलक्षणधारणात्परमार्थतः धर्मस्वभावतास्थिता एवेत्याशङ्कायां न स धर्मः इत्याह । सर्वभावानां परमार्थतः स्वभावेन परिनिर्वृत्तत्वान्न सम्भवति स्वलक्षणधारकत्वं । यद्येवं तर्हि भगवता अभावोऽभिसम्बुद्धो द्रष्टव्य इति विचार्य नाधर्मः इत्युक्तं । स तु प्रसज्यप्रतिषेधस्वभावः अनेन तावत्योगसमापत्तिं निर्दिश्य अध्यारोपोऽपवादान्तश्च निरस्तौ । तत्कस्य हेतोः? इत्युपपत्तिः पृच्छ्यते, तदर्थं असंस्कृतप्रभाविताः इत्याह । असंस्कृतत्वं तावद्धर्माणां परमार्थस्वभावः, तच्च युक्त्या विचार्यमाणमनुत्पत्तिलक्षणमेव पर्यवस्यति, यथा पूर्वं विचारितं ।

(१३९)
उक्तं भगवता धर्मसंगीतौ-

ऽयो आनन्द, धर्मोऽनुत्पन्नः, अनिरुद्धः, अस्थितः अविकृतस्तदुच्यते आर्यसत्यमितिऽ । इदमानन्द, अभिसन्धाय तथागतेन असंस्कृतप्रभाविता आर्यश्रावका इति देशितम्, यथा पूर्वमुक्तं ।

अयञ्चऽउत्पादाद्वा तथागतानाम्, अनुत्पादाद्वा तथागतानाम्, नित्यं तथैव सत्त्वान्निर्विकारत्वाच्चासंस्कृतः, तदधिगमादार्यपुद्गलाः तत्प्रभाविता भवन्ति, धर्मतत्त्वाधिगमेन प्रभावितत्वादार्यणां । अन्येषु तत्त्वसद्भावो नैव तावद्युज्यते, तच्च (तत्त्वं) असंस्कृतमपि न (स्यात्) प्रसज्यप्रतिषेधस्वभावाभावात्, भावस्वभावस्वात्तस्य । आर्यैः नान्यविधो भावस्वभावोऽवबुध्यते, तद्भिन्नस्वभावस्यैवाधिगमात् । भावग्रहणाभावेन तदभावरूपत्वे सति भावग्राह एव तावत्प्रसज्यते । अत एव आर्यसन्धिनिर्मोचनसूत्रे उक्तम्-ऽन तत्त्वस्य भावादितरोऽर्थःऽ इति ।

अतः यथोक्तदोष आपद्यते । तत्तु (तत्त्वं) परमार्थतो नास्ति भावस्वभावः, असिद्धैव भावस्वभावता कस्यापि । भावस्वभावतेव तदपि (१४०) संस्कृतं प्रसज्येत । अतः अभावरूपत्वेन धर्मेषु सत्त्वादतत्त्वमेव स्वभावेन तत् । सर्वेषामपि तज्ज्ञानप्रसङ्गः, भावस्वभाववत् । संक्लेशहेतुप्रसङ्गोऽपि दुर्निवारः स्यात् । अत एव तेषु आर्यसन्धिनिर्मोचनादिषु-ऽन तत्त्वस्य भावादितरोऽर्थःऽ इत्युक्तं । अत एव न धर्मो नाधर्मः इत्युवाच । अनेन भावाभावसदसदादीनां निषेधरूपं देशितं । अपि चानेन विक्षेपनिग्रहोऽपि निर्दिष्टः । एतत्सर्वैः स्थानस्यास्य गम्भीरत्वमपि संदर्शितं ।

(२) पुण्यहेतुकधर्मकायः

यदि भगवतोऽभिसम्बोधिर्वा धर्मदेशना वा नास्ति कश्चिओद्धर्मः, कथं तर्हि बोधिसत्त्वेन पुण्यहेतुधर्मकायं प्राप्तुकामेन सद्धर्मपरिग्रहेऽनुप्रवर्तितव्यमिति विचिन्त्य पुण्यहेतुधर्मकयकामताच्छन्दोत्पादनाय तत्किं मन्यसे सुभूते इत्युक्तं । तत्र सप्तरत्नानि तावत्स्वर्ण-रौप्य-वैडूर्य-अश्मगर्भ-मुसारगल्व-लोहितमुक्ता-स्फटिकाः आर्यसद्धर्मपुण्दरीके उक्तानि ।ऽचतुर्दीपादानां सहस्रं (१४१) साहस्रो लोकधातुः । तत्सहसं द्विसाहस्रः । तत्सहस्रं त्रिसाहस्रमहासाहस्रो लोकधातुःऽ । ततो निदानं इति रत्नदानानां निदानात्ततः पुण्योद्भवः, तदहेतोः सम्भवतीत्यर्थः । सर्वाणि कुशलचित्तानि, तदुत्पन्ना वासनाः पुण्यानि । तेषां राशिः स्कन्ध इति । फलबाहुल्यात्तद्बाहुल्यं । बहु इति विशेषणं । बहु बहु इति द्विरुक्त्या बाहुल्याधिक्यं ।

यदि परमार्थतः सर्वे (धर्माः) अनुत्पन्नाः, कथं ततो निदान पुण्यस्कन्धं प्रसुनुयात्? इत्याशङ्क्य तत्कस्य हेतोः? इत्युक्त्वा स्वयमभिप्रायं विदित्वा अस्कन्धः इत्यभिहितवान् । परमार्थत इति शेषः । प्रज्ञप्तिसत्त्वात्स्कन्धानां न पुण्यस्कन्धो भावरूपेण सम्भवति । पुण्यमपि वासनास्वरूपमवस्थाविशेषे उपचर्यते । भावानां स्थिरत्वेन अभिसंस्कारेण अप्रवृत्तत्वात्चित्तमपि प्रज्ञप्तिसन्मात्रमेव । एकानेकस्वभावेन प्रतिस्वं परीक्षायां मिथ्यैव तावत्स्वभावः । अत एव न पुण्यस्कन्धः परमार्थतो विद्यते ।

अनेन योगसमापत्तिः परिदीपिता, अध्यारोपान्तश्च निषिद्धः । विद्यन्त एव पुण्यस्कन्धाः संवृतौ । अत एव पुण्यस्कन्धस्तथागतेन भाषितः इत्युक्तं । यद्येवं न स्यात्, परमार्थतः स पुण्यस्कन्धो भवेत्(तदा) परमार्थस्य शब्दागोचरत्वात्न भवेत्तदभिधानं । अभाषितमित्येवं वचनं निरर्थकमिति चेत्? यतो भाषितास्तस्मात्संवृतावेवेत्यवगन्तव्यं । अनेनापवादान्तस्य निषेधो निर्दिष्टः । एवमार्यसुभूतिना अन्तद्वयपरिहारः कृतः ।

तदनन्तरं पार्षदा उदारधर्मश्रवणभव्याः, तेन च बहुतरं पुण्यमिति आवेदितुं भगवता यश्च खलु पुनः सुभूते इत्याद्युक्तं । अनेन तथागतानां (१४२) पुण्यहेतुकाधिगमकायस्य प्रवचनकायतो निर्जातत्वात्ततश्चतुष्पादिकायामपि गाथायां देश्यमानायां (यदा) तादृशं पुण्यायतनं भवेत्(तदा) तथागतानां पुण्यहेतुकधर्मकायस्य तु कथैव केति निर्दिश्यते । नायं पदार्थः, (तथापि) सामर्थ्यलभ्योऽयमर्थ इत्यदोषः । एतेन परमार्थतः धर्मदेशनायाः अभिसम्बुद्धस्य चाप्यसत्त्वे संवृतौ तावत्पुण्यकायदेशनायाः सत्त्वात्बोधिसत्त्वैः पुण्यमधिगान्तुं प्रवर्तयितव्यमेवेत्यभिप्रायः ।

अनेन तावद्विशिष्टपुण्यप्रतिपादनेन औदार्यमस्य परिदीपितम्, तदुत्पादाय च छन्दप्रणिधाने निर्दिष्टे । षट्पादिकाया गाथायाः सत्त्वेऽपि चतुष्पादिका इति विशेषीकृता । गाथा इति यत्र न यतिओ,ऽपादऽ शब्देन चतुःपादं गाथापरिमाणं परिगृह्यते । उद्गृह्य इति स्वाध्यायं विधाय । देशयेतिति पदानि । सम्प्रकाशयेतित्यर्थः । असंख्येयं इति संबहुलं । अप्रमेयं इति प्रमविषयातीतत्वात् । अनेन चार्थतः पुण्यानुत्तिविपक्षस्तावन्निराकृतः । पुण्यमित्युपलक्षणमात्रमेतेन तथागतस्य समस्तः पुन्यसम्भारो निर्दिष्टः ।

किमिति श्रद्धेयमात्रमुत युक्तितोऽवगम्यमिति मनसि कृत्वा तत्कस्य हेतोः? इति पृच्छायां अतो निर्जाता हि सुभूते, तथागतानामर्हतां सम्यक्संबुद्धानामनुत्तरा सम्यक्संबोधिः इति युक्तिवचनमभिहितवान् । एवं (१४३) बहुतरं पुण्यं इति तच्च बृहत्फलत्वात्तत्बहुतरं पुण्यम्, न तु स्वरूपतस्यस्य कायाभावात् । रत्ननिर्जातं तत्पुण्यं तु महापरिभोगादि गौणसाअंसारिकं फलं प्रापयति । प्रज्ञापरिगृहीतत्वे सति दानादीनां महाबोधिफलमधिगम्यते, न तु प्रादेशिकानां । धर्मदानेन तावदक्षयाप्रतिमतथागतपदप्राप्तेः तन्महत्त्वं किमिति न प्रसक्तम्? यथा धर्मेणानुग्रहो न तथा रत्नैः परेषामनुग्रहः । तथा हि परेभ्यः सम्प्रकाशितेन क्रमशोऽनेन धर्मेण क्षिप्रमेव बुद्धत्वपदं लभ्यते, न तु रत्नैः । अत एव परेभ्यः परानुग्राहकत्वाद्रत्नदानाद्धर्मदानं विशिष्टमित्याभिसन्धिः ।

अतो निर्जाताः इति संसाध्यते । दशचरितानि निःश्रित्य पारम्पर्येण प्राप्यन्त इत्यर्थः । तानि तावद्दश चरितानि- लेखनं पूजनं दानं वाचनं श्रवणं उद्ग्रहणं सम्प्रकाशनं स्वाध्यायः चिन्तनं भावना चेति । अतो निर्जाताश्च बुद्धा भगवन्तः इति संवृतौ एतान्याश्रित्य बुद्धाः प्रज्ञप्ता इति (१४४) वाक्यशेषः परमार्थतस्तु बोधिः बुद्धश्च भिन्नौ न स्तः । अनेन तावत्पुण्यस्य परमवैशिष्टयपरिदीपनेन तदुत्पादयितुं छन्द-प्रणिधानाभ्यां स्थातव्यमिति देशितं ।

यदि परमार्थतः सर्वधर्मानुत्पाद एव तदा सर्वे बुद्धधर्मा अप्यनुत्पन्ना एव भवेयुः तत्कथं अतो निर्जाता अनुत्तरा सम्यक्संबोधिरिति? न बुद्धानां बोधेर्भिन्नत्वमिति विचार्य तत्कस्य हेतो? इति परिपृच्छा, एतदर्थमत्र बुद्धधर्माः इत्युक्तं । बुद्धप्रज्ञप्तिहेतुका अनुत्तरसम्यक्संबोधिलक्षणा धर्मा एव हि बुद्धधर्माः । तस्मान्नैव केवलं बोधिभिन्नाः परमार्थतः बुद्धाः, अपितु प्रज्ञप्तिहेतुत्वादतो निर्जाता बुद्धः इत्युक्तमित्यभिप्रायः । तेऽपि परमार्थतोऽनुत्पन्नत्वादबुद्धधर्मा इति, संवृतिमाश्रित्य तथागतानामनुसम्यक्संबोधिस्तु अतो निर्जाता इत्यादिना तथागतेन भाषिता, न तु परमार्थत इति । अत

एव तत्तदितरपक्षेभ्यः बुद्धधर्मा इति परमार्थतो नैव वक्तुं शक्यते । प्रत्यात्मवेदनीयत्वेनानभिलाप्यास्त इत्यभिप्रायः । अनेन योगसमापत्तिः विक्षेपनिग्रहः गाम्भीर्यञ्च देशितानि ।

अत्र केचिदाहुः कथं त्रिधा भिन्नोऽयं धर्मकायः । अथ धर्मकायप्राप्तिः धर्मकायहेतोश्चानुरूपतया पुण्यस्वभावः, प्रज्ञप्त्या च प्रवचनस्वभावो धर्मकाय इति चेद्? तथा सति रूपकायोऽपि तत्प्राप्तेरनुरूपहेतुत्वात्तत्प्रापकहेतुत्वाच्च धर्मकायः स्यादिति । (अतः) तन्न सत्यम्, भगवतां बुद्धानां धर्मकायस्तु परिशुद्धज्ञानस्वभावस्तथा या च तस्य सामान्यधर्मता,. तस्यां व्यवस्थाप्यते । नास्त्यस्यायं विपाकभेदः, न चात्र प्रवचनपुण्ययोरुपचारेण धर्मः इति देशनापि । किमिव तर्हीति चेत्? वस्तुमात्रं धर्म इति देशना । धर्मा इत्यादि स्वयमेवं ख्यातत्वात् । स्वसामान्यलक्षणधारणाद्धर्मा इति यत्व्याख्यातं तत्सर्वधर्मसाधारणमिति न रूपकायस्तथागतत्वेन निर्दिष्टः, अज्ञापकत्वात् । प्रज्ञप्तित इत्युच्यमानेऽपि न रूपकायो धर्मकायत्वेन प्रसक्तो भवति, पुण्यहेत्वनुरूपत्वात्(१४५) तस्य । यथोक्तम्-

बुद्धानां रूपिकायो हि पुण्यं सम्भृत्य जायते ।
धर्मकायः समासेन ज्ञानसम्भारजो नृप ।।

तस्माज्ज्ञानसम्भारस्यैव तत्प्राप्त्युपायत्वान्न रूपकायेन स गृह्यते, प्रज्ञप्तिहेत्वभावान्नोच्यते रूपकायोऽधर्मकायःऽ इति । प्रवचनकायस्तु सम्यग्ज्ञानस्य फलमिति । सम्भारलक्षणपुण्यनिचयस्यापि तत्प्राप्तिहेतुत्वात्प्रज्ञप्त्या धर्मकाय इत्युच्यमानोऽपि युज्यत एवेति अलमधिकेन । अन्यत्कुचोद्यं युक्तमयुक्तं वेति विचक्षणैर्विवेचियिष्यत इति मत्वा पदबाहुल्यभिया न लिख्यते । धर्मकायाप्तिछन्दस्थानमुक्तं ।

इतः परं द्वादशविपक्षाणां प्रतिपक्षाणि द्वादशस्थानानि यथाक्रमं वेदितव्यानि । इमे तावद्द्वादश विपक्षाः-
१. अभिमानः
२. अभिमानाभावेऽपि अल्पश्रुतत्वम्
३. बाहुश्रुत्येऽपिहीनालम्बनमनसिकारभावना
४. हीनालम्बनमनसिकारभावनाया अभावेऽपि सत्त्वोपेक्षा
५. तदुपेक्षाया अभावेऽपि बाह्यशास्त्रेषु सानुरागा प्रवृत्तिः
६. तथा प्रवृत्त्यभावेऽपि भावनिमित्ताभिभवोपायेष्वकौशलम्
७. तत्र उपायकौशलेऽपि पुण्यसम्भारासञ्चयः
८. पुण्यसम्भारसञ्चयेऽपि लाभसत्कारकौसीद्यैः पिण्डास्वादनम्
९. तथास्वादनाभावेऽपि दुःखाक्षान्तिः
१०. दुःखाधिवासनायामपि ज्ञानसम्भारासञ्चयः
११. ज्ञानसम्भारसञ्चयेऽपि आत्मपरिग्रहः
१२. आत्मग्रहाभावेऽपि अववादायोगः

५. भावनाविशेषलाभेऽनभिमानस्थानं ः

तत्र भगवता धर्मपुद्गलयोर्विस्तरेण नैरात्म्ये देशितेऽपि अनादिकालीनदृढात्माभिनिवेशसञ्चयबलेन यदि कश्चिदेवं मन्येत- यस्य सत्त्वादिसंज्ञा प्रवर्तते, न स बोधिसत्त्व इति? एवं तर्हि यदुक्तं भगवताऽतस्मिन्कालेऽहं वीरदत्तो नाम नृपोऽभवम्,ऽ युष्मभ्यं मया धर्मो देशयिष्यते इत्यादि कथं स्यात् । (अतः) सत्त्वसंज्ञादिविरहस्य नैवमभिप्राय इति विघ्नभूताभिमानविसंयोगार्थं पञ्चमस्थानमधिकृत्याह- तत्किं मन्यसे सुभूते इत्यादि ।

अस्यायमत्र सामान्यतोऽर्थः- ये मम मृदुश्रावकाः स्रोतऽपन्नत्वादिषु धर्मनैरात्म्यानधिगमादप्राप्तरसानुभवाः, तेषामपि अहन्त्वेन ममत्वेन चाभिनिवेशो न भवति, किं खलु पुनः उभयनैरात्म्याधिगमेन प्रहीणनिरवशेषावरणानामिति । तस्मिन्कालेऽहम्..... इत्यादि यत्तल्लोकेन सह व्यवहारप्रज्ञप्त्यर्थं परसन्तानव्यवच्छेदमात्रज्ञापनार्थं वा, सेनावनादिव्यवहारवत्, न त्वेकत्व- (१४७) शाश्वतत्वाभिनिवेशतया । तत्त्वज्ञानस्थितैः न शक्यते तावल्लोकेन सह व्यवहर्तुं । तस्मादभिमानस्थानविसंयोगार्थं त्वयापि नात्मन्यभिनिवेष्टव्यमिति समादापयति ।

तत्र स्रोतः निर्वाणमहानगरप्रापकदर्शनमार्गलक्षणम्, आपन्नः प्राप्तः, दर्शनप्रहेयसमस्तक्लेशप्रहायकः स्रोत आपन्न इति, तस्य च कर्तरि कर्मणि क्रियायां चाभिनिवेशप्रहाणेन इदम्प्रत्ययताधिगमान्नैरात्म्याधिगमो दर्शितः । मया इति कर्तर्यभिनिवेशः । फलं इति कर्मण्यभिनिवेशः । प्राप्तः इति क्रियायामभिनिवेशः । इत्यनेन तावदर्थतः मया प्राप्तमिति विपक्षत्वेन परिदीत्यते । न स्रोतऽपन्नस्यैवं भवति मया प्राप्तं इत्यनेन अपलक्षणमात्रप्रदर्शनेन सर्वेषामभिमानानां प्रहेयत्वं प्रदर्शये । तत्र छन्दः प्रणिधानञ्चापि निर्दिश्यत इति । आर्यसुभूतिरपि भगवतोऽभिप्रायं निर्दिशन्परमार्थस्थापन्नार्थं तत्र योगसमापत्तिं च ग्रहीतुं न हि स भगवन्कञ्चिद्(धर्मं) आपन्नः इत्याह । कथमिति न रूपमापन्नः इत्याद्याह ।

अनेन तावत्परमार्थत फलद्वैविध्यस्याप्राप्यत्वमपि निर्दिश्यते, तथा हि-फलभूतं प्राप्यस्वभावं किञ्चित्स्यात्(तर्हि) संस्कृतमसंस्कृतं वा स्यात् । तत्र तावदनुत्पन्नमेवासंकृतम्, अभावरूपत्वाद्शशविषाणमिव तन्न युज्यते (१४८) प्राप्तुम्, अप्राप्त्यवस्थाविशिष्टत्वात् । संस्कृतं तावत्क्षणिकम्, उत्पादसमनन्तरं विनाशित्वात्, स्थितेरभावात्केनापि कथमपि तन्न प्राप्तुं शक्यते । यस्मिन्सन्ताने नैरात्म्यमार्गलक्षणहेतुसन्निहिततया क्लेशमुत्पादात्यन्तविरुद्धाश्रयलक्षणं फलमुत्पद्यत इति फलं प्राप्त्यत इत्येवमुच्यते, न तु परमार्थतः ।

अपि च, प्राप्यप्रापकभावः खलु भिन्नकालिकः समकालिको वा स्यात् । तत्र न तावत्प्रथमः पक्षः द्वयोरपि स्थितत्वात्, भिन्नकालिकस्तु एकस्मिन्प्रत्यासन्नेऽपरस्य चासंनिहिते सति (भवति), तत्कथं द्वयोः स्थितिरिति । न च समकालावस्थितयोरुभयोः परस्परोपकारकत्वम्, असति चोपकारे प्राप्यप्रापकभावो नैवोपयुज्यते, अतिप्रसङ्गत्वात् ।

अन्योऽन्यसंयोगेनोत्पादलक्षणेनापि प्राप्यप्रापकभावस्य समकालिकत्वं न युज्यते, तथा हि- येऽमूर्तभावाः, ते नैव संयुज्यन्ते, क्वचिदप्यनवस्थानात्तेषां । न स्यात्प्राप्यप्रापकभावे समकालत्वमात्रमपि तेषाम्, अतिप्रसङ्गात् । न चाप्येकस्य हेतुत्वम्, उभयोः साधारणत्वात्, इदं प्राप्यमिदञ्च प्रापकमिति निश्चयो न भवती । ये तावन्मूर्ताः, तेषां सर्वात्मना संयोगे सति एकत्वं प्रसज्यते, एकदेशेन (संयोगे तु) सावयवत्वं प्रसज्यते । नैरन्तर्येणावस्थानेऽपि न भवितुं शक्नोति उभयोः साधारणत्वात् । अविशेषान्न निश्चयः । अतः कल्पनासमारोपित एवायं । अनेन तावत्सर्वः कर्मकर्त्रादिव्यवहारः स्पष्टमवबोद्धव्यः ।

धर्माः इति धर्मायतनम्, अनेनासंस्कृतमपि संगृह्यते, धर्मायतनस्य सप्तद्रव्यात्मकत्वात्, शेषेण रूपादिना च धर्मायतनैकदेशेन च संस्कृता निर्दिश्यन्ते । उपलक्षणमिदं अतश्चक्षुरादिकं ग्रहीतव्यं । एवं यतः परमार्थतः स कञ्चित्(धर्मं) नापन्नः, मया प्राप्तमित्यपि न मन्यते, तस्मात्सन्मार्गस्थितत्वात्स्रोतऽपन्न इत्युच्यते ।

(१४९)
यदि मया प्राप्तमित्यभिनिवेशस्तदा कथं नोच्येत स्रोत आपन्न इति विचिन्त्य सचेद्भगवनित्याद्याह । मया इति यस्याहमित्यभिनिवेशः स्यात्तस्य नास्त्यात्मदृष्टिप्रहाणम्, यश्चाप्रहीणात्मदृष्टिः स अनुत्पन्नार्यमार्गः, यश्चानुत्पन्नार्यमार्गः, स पृथग्जन इति कथं स्यात्स्रोत-आपन्न इत्यभिसन्धिः । एवं हिऽमया इति योऽयमभिनिवेशः, स आत्मदृष्टिसमुदयः । अनेन चित्तप्रग्रहो निर्दिष्टः । अनेन तावत्सकलेन स्थानस्यास्य गाम्भीर्यमभिहितं ।

अमुमेवार्थं दृष्टान्तान्तरे प्रपञ्च्य निर्देष्टुं सकृदागामिनः इत्याद्याह । अत्रापि पदार्थाभिसन्ध्यादीनि पूर्ववद्योज्यानि । प्रहीणभावनाहेतषड्विधकामावचरक्लेश एवार्यसकृदागामी, सकृदागामित्वात्कामधातौ । प्रहीणभावनाहेयसकलकामावचरक्लेश एवानागामीत्युच्यते, पुनरनागामित्वात्(१५०) कामधातौ । यदा समस्तत्रैधातुकावचरक्लेशमलानां प्रहाणं जायते, तदा स सकललोकपुज्यत्वादर्हन्नित्युच्यते । न हि स कश्चिद्धर्मो योऽर्हन्नाम प्रहीणतथाविधक्लेशावरणज्ञानसन्ततौ उपचरितत्वात्, सन्ततेश्च प्रज्ञप्तौ सत्त्वान्न स कश्चन परमार्थतः, समारोपित एवासावित्यभिप्रायः ।

साम्प्रतं आर्यसुभूतिःऽअहंऽ पदप्रयोज्यमात्मानमधिकृत्य विशिष्टत्वेन अरणाविहारीति साधारणगुणत्वेन अर्हन्निति चऽअहमस्मिऽ इत्यनेनोक्त्वा चित्तप्रग्रहमात्रं दर्शयितुं अहं इत्याद्यवोचत् । अरणा इति समाधिविशेषः, अत्र चोभतोभागविमुक्तत्वमर्हत्त्वमालम्ब्य तदितरेषु रणा नोत्पाद्यन्त इति विचिन्त्य योगः समापद्यते । ततो व्युत्थाय तमालम्ब्य तदितरेषु नोपजायन्ते रणाः । यस्तया अरणया विहरणशीलः स एवमुच्यते । सुगमोऽयं विभङ्गः ।

(१५१)
न मां व्याकरिष्यतिति तदा अप्रहीणत्वादात्मदृष्टेर्मया स्रोत-आपत्तिफलमपि दुर्लभम्, किं खलु पुनः उभतोभागविमुक्तेनार्हता प्राप्यमरणाविहारित्वमित्यभिसन्धिः । कथमरणायां विहर्तव्यमिति चिन्तायां न क्वचिद्विहरति इत्यवोचत् । प्राप्तं मया किञ्चत्संकृतमंस्कृतं वेत्येवमभिनिवेशेन योऽस्थितः, स

एवारणाविहारीति द्विरभिधानम्, नापर इत्यर्थः । अधुना अहमस्मि भगवंस्तथागतेनार्हता सम्यक्सम्बुद्धेन अरणाविहारिणामग्र्यो निर्दिष्टः । अहमस्मि भगवनर्हन्वीतरागः इति नात्माभिनिवेशेन, अथ कथमिति चेत्? व्यवहारमात्राभिनिवेशतया, एतच्च प्रागेव मया प्रोक्तं ।

६. बुद्धोत्पादारागता-स्थानं ः

नन्वसति कस्मिंश्चिदपि प्राप्ये प्रापके वा परमार्थतः, बोधिसत्त्वभूतेन भगवता कथं तथागतदीपङ्करस्यान्तिकाद्धर्म उद्गृहीतः? अथ नोद्गृहीत इति चेद्? तदास्माभिर्धर्ममुद्ग्रहीतुकामैः कथमाराधनीस्तथागतोत्पाद इति ये परिकल्पयन्ति तेषामल्पश्रुतत्वप्रतिबन्धापाकरणार्थं षष्ठं स्थानमधिकृत्याह- अस्ति स कश्चिद्धर्मो यस्तथागतेन दीपङ्करस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्यान्तिकादुद्गृहीतः? इति । सुभूतिरपि प्रागेवाभिप्रायं विदित्वा नो हीदं इत्यवोचत् । नास्ति परमार्थतः कस्यचिदपि धर्मस्य प्राप्यप्रापकत्वेन उद्ग्रहणं नाम, यथोक्तं पूर्वं ।ऽसर्वे धर्माः प्रकृत्या शान्ताःऽ (१५२) तथापि तथागतानुभावेन नानापदसमुदायादीनां ज्ञानावभासोत्पादमत्रे उद्गृहीतः इत्युपचर्यते, अतः श्रुतपर्येषणं सफलं ।

अनेनार्थतःऽबोधिसत्त्वेन श्रुतपर्येषणकाले बुद्धोत्पाद आराधनीयस्तदनन्तरं बुद्धधर्मा उद्गृहीतव्याःऽ इत्यभिनिवेशो विपक्षत्वेन निर्दिष्टः । तत्प्रहाणे छन्दप्रणिधानाभ्यां स्थातव्यमित्यपि निर्दिष्टं । अस्ति स कश्चिद्धर्मो दीपङ्करस्यान्तिकादुद्गृहीतः? इति दिङ्मात्राभिधानेन उद्गृहीतधर्मस्य सर्वनिमित्तं विनिवर्तते ।ऽनास्ति स कश्चिद्धर्म उद्गृहीतःऽ इत्यनेन परमार्थतः धर्माणामग्राह्यत्वं व्यवस्थाप्य तत्र योगसमापत्तिः विक्षेपनिग्रहश्च निर्दिष्टौ । स्थानस्यास्य गाम्भीर्यमपि परिदीपितं ।

७. क्षेत्रविशुद्धिप्रणिधान-स्थानं ः

यदि परमार्थतः कर्मकर्त्रादयो न स्युस्तदा कथं बोधिसत्त्वा बुद्धक्षेत्रपरिशोधनार्थं प्रणिदधतीति तर्कयतां तेषां हीनालम्बनमनसिकारभावनाविबन्धसंयोगार्थं सप्तमस्थानमधिकृत्याह- यः कश्चिद्बोधिसत्त्वः इति । वितथं इति मृषा । यद्येवं (तर्हि) भगवान्बोधिसत्त्वानां तत्तत्क्षेत्रपरिशुद्धिसम्पदं कथमुक्तवानिति विचिन्त्य तत्कस्य हेतोः? इति पृच्छायं क्षेत्रव्यूहाः इत्यादि समाधानमभिहितं । बहूनि क्षेत्राणि तु क्षेत्रव्यूहाः । अव्यूहास्ते इति परमाणुभिराब्धोऽवयविभूतो वा नास्ति कश्चिद्व्यूहः परमार्थत इत्यव्यूहा एव ते, तथापि स्वप्नोपलब्धक्षेत्रव्यूहवदविचाररमणीयमात्र संवृतिसत्त्वमुक्तं तेनोच्यन्ते क्षेत्रव्यूहाः इति । अन्यथा (१५३) परमार्थस्वभावस्त्वनाभिलाप्यतायानभिलाप्य इत्यभिप्रायः । उक्तञ्चाप्रतिष्ठितत्वं प्रागेव । एवां मुषितस्मृतिकानामुपकाराय उपसंहारोपयेन स्मारयितुं तस्मादित्याद्याह । एवं इति यथोक्तेन विधिना, कस्यचिदपि वस्तुनः सिद्धेरभावात्तत्रऽअप्रतिष्ठितं चित्तमुत्पादयितव्यम्ऽ इत्यर्थः । शेषं तु पूर्ववत् ।

तत्र वितथं वदेतित्यनेनार्थतः परमार्थतः मया क्षेत्रव्यूहो निष्पाद्यत इत्यभिनिवेशो विपक्षत्वेन परिदीपितः ।ऽक्षेत्रव्यूहाःऽ इति निमित्तमात्राभिधानेन समस्तहीनालम्बनभावनाविसंयोगो निर्दिष्टः । हीनालम्बनमनसिकारभावनां प्रति छन्दः प्रणिधानमपि [न कर्तव्यमित्यपि] निर्दिष्टं । अव्यूहास्ते

तथागतेन भाषिताः इत्यनेन परमार्थव्यवस्थापनेन योगसमापत्तौ प्रवृत्तिः गम्भीरता च निर्दिश्येते । तेनोच्यन्ते क्षेत्रव्यूहाः इत्यनेनापवादान्तं परिहृत्य विक्षेपनिग्रहो निर्दिष्टः, स्थानस्यास्य औदार्यं च परिदीपितं ।

८. सत्त्वपरिपाक-स्थानं ः

स्कन्धेभ्यः पृथक्त्वेनासत्त्वेऽपि किं नाभिन्ना एव सत्त्वाः? अन्यथा सत्त्वपरिपाकार्थं कथं बोधिसत्त्वाः प्रवर्तेरन्? इति यो विचारः, तस्मात्सत्त्वोपेक्षालक्षणविघ्नभूताद्विसंयोगार्थं अष्टमस्थानमधिकृत्य तद्यथापि नाम इत्युक्तं । पुरुषः इत्यसुरेन्द्रो राहुरिति । तस्यात्मभावस्तु कामधातौ सुमेरुपरिमाणः । तस्य महत्त्वेऽपि व्यर्थैव तन्महत्ता । किमर्थं देशितं भगवतेत्यभिप्रायं वक्तुकामनया तत्कस्य हेतोः? इत्यापृष्टं । तमेव अभिप्रायं वक्तुमाह- न भावः इति । परमार्थतः एकानेकस्वभावेन वियोगात्(१५४) निःस्वभावता एव । स्वप्नदृष्ट इव स आत्मभावः संवृतितः प्रोक्तस्तथागतेन, न तु परमार्थतः ।

तेनोच्यते आत्मभावः इत्यत्रोपपत्तिमाह । एवमयं संवृतिरेव, तस्मात्तथोच्यते, अन्यथा परमार्थतः कस्यचिदपि धर्मस्यासिद्धत्वात्तथा नोच्येतेत्यभिप्रायः । अभावं तावद्भावत्वेनाभ्युपगच्छतां तेषां जैमिन्यादीनां प्रतिषेधार्थं न स भावः इत्याह । अभावस्य तु भावव्यतिरेकेण स्थितलक्षणत्वात्कथं तद्विपरीतस्वभावो न स्यात्?s तेनोच्यते आत्मभावःs । अन्यथा पतमार्थतः कस्यचिदप्यात्मभावस्यासिद्धेः किमित्यात्मभाव इहोच्यते, ततोऽयमभावत्वेन देशितः सुमेरुमात्रपरिमाणोऽपि य आत्मभावो यदा निःस्वभावत्वात्परमार्थतो नास्ति, तदा कथं परात्मभावः सस्वभावः सात्मको वा भवेत्?

अत्रार्थतः सत्त्वपरिपाकायोद्यमरतानां बोधिसत्त्वानां सत्त्वाभिनिवेशः परमार्थतः विपक्षत्वेन प्रदर्शितः तत्प्रहाणाय छन्दः प्रणिधानं च निर्दिष्टे ।sपुरुषःs इत्युपलक्षणमात्राभिधानेन अण्डजादीनां सर्वेषां पृथगात्मभावानां परिग्रहणमुक्तं । न भावः स तथागतेन भाषितः इत्यनेन तावत्परमार्थं व्यस्थाप्य योगसमापत्तिस्थानं गम्भीरत्वं च परिदीपिते । न स भावः इत्यनेन तु विक्षेपनिग्रहो निर्दिष्टः ।

९. बाह्यशास्त्रेषु व्यपगतरागता-स्थानं ः

सम्प्रत्यस्य धर्मपर्यायस्य महार्थत्वप्रतिपादनेन बाह्यशास्त्रेष्वभिनिविष्टानां तत्रानुनयविक्षेपपरिहारार्थं नवमस्थानमधिकृत्य- तत्किं मन्यसे सूभूते इत्याह । (१५५) अनेन तावत्चतुर्भिः प्रकारैरस्य धर्मपर्यायस्य वैशिष्ट्यं परिदीप्यतेपुण्यपरिग्रहः, देवादिभिः सत्कारः, दुस्करकृत्यविधानम्, तथागतादितुल्यताकरणं । तत्र पुण्यपरिग्रहस्तु यदाह ततो निदानं बहुपुण्यस्कन्धं प्रसुनुयातिति । देवादिभिः सत्कारस्तु यदाह स पृथिवीप्रदेशः चैत्यभूत्यभूतो भवेदिति । दुष्करकृत्यविधानं तु यदाह परमेण ते आश्चर्येण समन्वागता भविष्यन्ति इति । तथागतादितुल्यताकरणं तु यदाह तस्मिंश्च पृथिवीप्रदेशे शास्ता विहरत्यन्यतरान्यतरो वा विज्ञगुरुस्थानीयः इति ।

तत्र रत्नदानस्य पुण्याभिधानं विशेषद्वयेन विशिष्टं परिदीपितम्- वस्तुविशेषः क्षेत्रविशेषश्च । वस्तुविशेषोऽपि तावतुदारः प्रणीतश्चेति ।- (१५६) तत्रौदार्यं तु वस्तुभेदसंबाहुल्यम्, यदाह तावतो लोकधातूनिति । प्रणीतस्तु लोके दूर्लभत्वेन ख्यातः यदाह सप्तरत्नपरिपूर्णं कृत्वा इति । क्षेत्रं स्वपरार्थसम्पद्योगेन विशिष्टं । तत्र परार्थसम्पत्तावत्हेयोपादेयार्थानां परेभ्योऽविपर्ययेण सम्प्रकाशनम्, आह तथागतेभ्यः इति । यथा वस्तुतथता तथा भाषितत्वात्निरुक्त्या तथा उक्त इति कथ्यते ।

स्वार्थसम्पत्तु ज्ञान-प्रहाणसम्पद्भेदेन द्विविधा । तत्र अर्हद्भ्यः इत्यनेन प्रहाणसम्पद्दर्शिता, हतक्लेशारित्वाद्निरुक्त्याऽअर्हन्ऽ इत्युच्यते । सम्यक्सम्बुद्धेभ्यः इत्यनेन तावज्ज्ञानसम्पदुक्ता । तस्मात्पदत्रयस्योक्तेः साफल्यमिति सामान्येन सङ्ग्रहार्थः ।

आरोचयामि इतीच्छा द्योतिता भवति । आरोचयामि प्रतिवेदयामि अवबोधयामि प्रज्ञामुत्पादयामीत्यर्थः । तत्र पूर्वं तावत्परस्य फलं अथवा अपरं तु पूर्वस्य व्याख्यानं । देशयेतिति शब्दं सम्प्रकाशयेतिति छन्दं अधिमुक्तिमुत्पादयेदित्यर्थः । संख्यया परिच्छेत्तुमशक्यत्वादसंख्येयं इति । प्रमापयितुमशक्यत्वाद्दृष्तान्ताभावाद्वा अप्रमेयं इति ।

भाष्येत इति आत्मना ग्रन्थस्वाध्यायः, सम्प्रकाश्येत इति परेभ्यः सम्यक्पदार्थदेशाना, अथवाऽभाष्येतऽ इति पदम्ऽसम्प्रकाश्येतऽ इत्यर्थं । चैत्यभूत्यभूतः इति वन्दनीयः, चैत्य एव चैत्यभूतः वशीभूत इतिवत्, यदैवं पुद्गलनैरात्म्यगाथामात्रोपदेशेनापि चैत्यभूत्यभूतो जायते किं खलु पुनः नैरात्म्यद्वयोपदेशेन इत्यभिप्रायः । उद्गृह्य इति पदम्, धारयिष्यन्ति इत्यविस्मरणम्, वाचयिष्यन्ति इति पुस्तकगतं पर्यवाप्स्यन्ति इति अर्थं ।

(१५७)
अनेन तावद्श्रुतमयप्रज्ञया धारणं दर्शितम्, चिन्तामय्या भावनामय्या प्रज्ञया चोद्गृहीतत्वाद्योनिशश्च (मनसि करिष्यन्ति) इत्याह । अविपरीततयार्थमवबोधयिष्यन्तीति वाक्यशेषः । क्वचिद्धारयिष्यन्ति इत्येकमेव पदम्, तत्र धारणं तु पदार्थयोर्द्रष्टव्यं । परमेण आश्चर्येण इति तु एवंविधगम्भीरोदारधर्मस्याधिगतत्वात् ।

शास्ता ..... स्थानीयः इति धर्मभाणकः, शास्तृकृत्यकरणात्, स एव साक्षाद्धरमाणबुद्ध इवेति वाक्यशेषः । गुरु इति मञ्जुघोषाद्यन्यतरः कश्चित्तत्कार्यसाधनाय धर्मभाणकः स्थानीयरूपेण द्रष्टव्यः । कुत्रचितन्यतरान्यतरो इति पदद्वयं । तच्च ये केचन गुरुसदृशाः (तेषां) सर्वेषां पर्यायः । अतस्तत्र स्थानीयः इति निर्दिष्टः । एभिः सर्वैः स्थानस्यास्यौदार्यं निरूपितं । अर्थतश्च सद्धर्मपरिग्रहमुत्सृज्य बाह्यशास्त्रानुरागो विपक्षत्वेन परिदीपितः, तस्मिन्ननुरागं परित्यज्य धर्मं प्रतिपत्तुं छन्दः प्रणिधानं च दर्शिते । इतो धर्मपर्यायादित्युपलक्षणमात्रपरिकीर्तनेन बाह्यशास्त्रेष्वनुरागं परिवर्ज्य सर्वसद्धर्मान्प्रति यत्न आस्थेय इति परिदीपितं ।

अचिन्त्यसामर्थ्यन्वितत्वादयं धर्मपर्यायः नाममात्रश्रवणेनापि परानुपकरोतीति सत्त्वानां पुण्योत्पादकथनाय आर्यसुभूतिः को नाम अयं इति पृष्टवान् ।- (१५८) कथं चैनं धारयामि इत्यनेन अस्योद्ग्रहणेनाप्यप्रमेयपुण्यं भवतीति परिदीप्यते ।

प्रज्ञापारमिता नाम इति यस्या तन्नाम तत्तथा उच्यते । इयं प्रज्ञापि, पारमधिगम्य परिच्छेदयतीत्यपि पारमितेति, प्रज्ञा च सा पारमिता चेति समासः । अथवा प्रज्ञायाः पारं प्रज्ञापारम्, अनया तदधिगम्य परिच्छिद्यतेऽतस्तथोच्यते । सा चार्थतः सर्वविधप्रज्ञासु उत्तमा ताथागती प्रज्ञा नान्यदा प्रज्ञया पारं परिमापयितुं शक्यं । अथवा प्रज्ञ्यापारं इता गता इत्येवार्थः । सा च यथोक्ता प्रज्ञैव, न त्वन्यत्तत्पारगमनासम्भवात् । अनेन दानपारमितादयोऽप्युक्ता भवन्तीति । तदभिधानेनायं धर्मपर्यायोऽपि तथोक्तः, यथा सीताहरणादिकाव्ययोजना । तस्याश्च भगवताः प्रत्यात्मवेद्यत्वेनासाधारणत्वात्परमार्थतश्चानुत्पन्नत्वात्सा शब्देनाभिधातुं न शक्यत इत्याशयेन वितर्क्य तत्कस्य हेतोः? इतिओ पृष्टवान् । यैव सुभूते, प्रज्ञापारमिता तथागतेन भाषिता सा इत्युदतरत् ।

परमार्थतः प्रत्यात्मवेद्यत्वेनासाधारणत्वात्परमार्थतश्च सर्वधर्माणां अत्यन्तानुत्पन्नत्वात्च सा न शब्देनाभिधेया, तथापि विकल्पप्रतिबिम्बः- (१५९) स्वस्वरूपबहिर्भूत इवारोप्यते । स विकल्पोऽपि प्रकृत्या भ्रान्तः, अतस्तेन समारोपित आकारोऽपि मिथ्यैव । तस्मात्विकल्पप्रतिबिम्बभूता या प्रज्ञापारमिता तथागतेन देशिता, सा शब्देन व्युत्पाद्यमाना अपारमितैव, न तु तथागतस्य प्रज्ञा, सत्यसंवृत्या ज्ञेयस्य पारङ्गतत्वात्तस्याः, अन्यथा कथं भगवान्सर्वज्ञः स्यादिति । ततो भ्रान्तप्रतीतेः स विकल्पप्रतिबिम्बो नैव भेदेनावगम्यते, अतो ज्ञानस्वभावत्वेन सैव परमार्थप्रज्ञा तथागतेन भाषिता इत्युच्यते । तस्मात्तथाविधदेशनायां नैव विरोध इत्यभिप्रायः । अथवा या ताथागती प्रज्ञा प्रतीतिरूपत्वेन तथागतेन भाषिता सैव परमार्थतो न विद्यते, परमार्थतोऽपारङ्गतत्वात्तस्याः । एव इति शब्दस्तु अपारमिता इत्येतदनन्तरं द्रष्टव्यः ।

अनेन परमार्थत्वं प्रतिपाद्य तत्र योगसमापत्त्या कथं प्रतिपत्तव्यमिति निर्दिष्टं । यथा प्रज्ञापारमिता विकल्पप्रतिबिम्बात्मिकैव बाह्यत्वेन समारोप्य भगवता भाषिता, तथैव सर्वे धर्मा अपि नान्यथा तथागतेन कथिता इति देशनार्थमाह- तत्किं मन्यसे सुभूते इति । परमार्थतः सर्वधर्माणामसिद्धत्वात्, सिद्धेष्वपि स्वलक्षणस्यासाधारणत्वेन सङ्केतेन प्रज्ञपयितुमशक्यत्वात्, सामान्यलक्षणमेव तावत्प्रज्ञप्यमानत्वात्, स्वसामान्यलक्षणे व्यतिरिच्य अपरस्याभिधेयस्याभावात्परस्परपरिहारस्थितलक्षणत्वात्तयोः, अत एव च परमार्थतःऽनास्ति कश्चिद्धर्मो यस्तथागतेन भाषितःऽ इति विज्ञाय स्थविरः सुभूतिः नो हीदं भगवन्, नास्ति स कश्चिद्धर्मो यस्तथागतेन भाषितः इत्यवोचत् । अनेन विक्षेपनिग्रहः गाम्भीर्यं च निर्दिष्टे भवतः ।

(१६०)

१०. सत्त्वभाजनलोकयोः पिण्डग्राहविशीर्णतायोग-स्थानं ः

एवं सर्वधर्मेषु नैरात्म्यं विस्तरेण दर्शितम्, तथापि ये तावदादिकर्मिकाः कथं सर्वधर्मेषु नैरात्म्यं भावयितव्यमिति चिन्तयन्ति, भावनिमित्तमभिओभवितुमनुपायकौशलविसंयोगार्थं दशमस्थानधिकृत्याह- तत्किं मन्यसे सुभूते इत्यादि । अत्र द्विविधेन उपायेन एकानेकस्वभावावियोगाधिगमात्सर्वधर्मनैरात्म्यं भावयितव्यमिति दर्श्यते । तत्र द्विविध उपायस्तावत्तनूकरणोपायः निराभासकरणोपायश्च । तत्र यावत्पृथिवीरजो भवेतित्यनेन एकस्वभाववियोगाधिगमात्तनूकरणोपायो निर्दिश्यते । न युज्यते ह्यस्य लोकधातोरेकत्वम्, आवृत्तानावृत्तादिविस्पष्टलक्षणयुक्तत्वाद् । अनेकत्वनिराकरणाय तावत्परमाणोर्निराकरणमभ्युपेतव्यं । अत एव परमाणुविभावनायां सत्यामेकत्वं प्रहीयत एवेति । बोधिसत्त्वैस्तावत्प्रायेण परीत्तालम्बनमनसिकाराभावात्त्रिसाहस्रमहासाहस्रलोकधात्वालम्बनार्थं त्रिसाहस्रमहासाहस्रे इत्याह । अनेन तावदौदार्यं परिदीपितं ।

ते च परमाणवोऽपि यदि दिग्भागभेदेन भिन्नत्वादसिद्धा एव स्युः, (तर्हि) कथं तद्बहु रजः? इति प्रवादिनामाशयमभिलक्ष्य कस्य (१६१) हेतोः? इत्यपृच्छत् । यत्तद्पृथिवीरजः इति तदुदतरत् । बहु तत्पृथिवीरजोऽपि यः परमाणुस्वभाव उक्तस्तदेकत्वग्रहणनिषेधात्तदरज एव । मायानिर्मितस्वभावत्वान्नास्ति परमाणुः परमार्थतः, बुद्ध्योपचरितरूपत्वात् । इदं तावदेकत्वग्रहणोपायमात्रम्, न तु परमार्थम्, तेनोच्यते पृथिवीरज इति । तद्युक्तं संवृतौ सत्त्वात्, अन्यथा परमार्थस्तस्यासत्त्वादनभिलाप्यत्वाच्च स्वलक्षणं नाभिलप्यत इत्येवमभिप्रायः । उद्भावनासंवृत्यापि तस्य देशनं न युज्यते, तदीयान्यतरात्मस्वभावस्य अप्रतिभासमानत्वात् । अनेन तावदनेकस्वभाववियोगाधिगमोपायो निराभासकरणत्वेनोपदर्श्यते । एवञ्चान्तशः परमाणूनामपि युक्त्या प्रत्येकं परिक्ष्यमाणानां प्रतीतावेव सत्त्वात्प्रतीयते लोकधातूनां चानेकस्ववियुक्तत्वम्, ततश्च (तेषां) निःस्वभावत्वमवगम्यते ।

एवं खलु भाजनलोकस्य एकानेकस्वभाववियोगेन निःस्वभावत्वमृ एवमभिधाय सत्त्वलोकस्याप्यभिधानार्थं योऽसौ लोकधातुः इत्याह । अत्र लोकधातुना सत्त्वलोकोऽभिप्रेतः, इतरस्य पूर्वमेवोक्तत्वात् । अधातुः सः इति एकानेकस्वभावरहितः स इत्यभिप्रायः । एवं यो हि रूपस्कन्धः स भाजनलोकत्वेनाभिहितः, शेषाश्चत्वारः स्कन्धास्तु यथैकानेकस्वभावेन वियुक्तास्तथा पूर्वं विवेचिता एव । एवं सति परमार्थतो निःस्वभावत्वात्सर्वे धर्मा मायोपमा दृश्यन्ते योगिभिः ।

अनेन गाम्भीर्यमपि तावदुक्तं । अर्थतः परमार्थे सत्त्वभाजनलोकीयभावाभिनिवेशो विपक्षत्वेन परिदीपितः । तत्प्रहाणार्थं च छन्दः प्रणिधानं च निर्दिष्टे । त्रिसाहस्रमहासाहस्रे लोकधातौ इति निमित्तमात्राभिधानेन सर्वभावानां निःस्वभावत्वभावना सन्दर्शिता । अरजस्ततिति अधातुः इत्याभ्यां परमार्थव्यवस्थापनया योगसमापत्त्या कथं प्रतिपत्तव्यमिति तत्परिदीपितं । तेनोच्यते लोकधातुः इत्यनेनापवादान्तं परिहृत्य विक्षेपनिग्रहो निर्दिष्टः ।

(१६२)

११. तथागतपूजासत्कार-स्थानं ः

सम्प्रति ये बोधिसत्त्वाः पुण्यसम्भारप्रतिपत्तयेऽत्यन्तमुपकारित्वाद्भगवन्तं पूजयेयुस्तेषां तस्य (भगवतः) अविनाशिकायो न पूरयति पुण्यसम्भारम्, सम्यङ्मनसिकाराप्रवृत्तत्वात् । तस्मात्तेषां सम्भारासञ्चयतो वियोगार्थं एकादशस्थानमधिकृत्याह- तत्किं मन्यसे सुभूते इत्यादि । सामान्यतोऽत्रायं सङ्ग्रहार्थः, तथागतपूजासत्कारेषु लक्षणसम्पदा तथागतो न द्रष्टव्यः, अथ कथमिति चेत्? परमार्थधर्मतायामित्युच्यते ।

इह अवशिष्टव्याख्यानं तु रूपकायाप्तिकामतास्थानानुरूपं । न चात्र पुनरुक्तिरप्याशङ्कनीया । पूर्वं रूपकायाप्तिकामताप्रसङ्गे तु तद्व्युदासो दर्शितः, अधुना तथागतपूजासत्कारप्रसङ्गे दर्शितत्वाद्भिन्न एव (रूपकायः) । अत्रार्थतः रूपकाये तथागताभिनिवेशं विपक्षत्वेन निर्दिश्य तत्प्रहानार्थं छन्दः प्रणिधानं चापि प्रदर्शिते । लक्षणानि इत्युपलक्षणमात्रोक्त्या सकलो रूपकायः परिदीपितः । अलक्षणानि इति परमार्थव्यवस्थानं । तेन इत्यादिना विक्षेपनिग्रहो निर्दिष्टः ।

१२. कायचित्तपरिश्रान्तौ विर्यम्युख्यानारम्भलाभ-सत्कारविरहितता ः

एवं सर्वधर्माणां नैरात्म्यावगमोपाये निर्दिष्टेऽपि कायजीवितेष्वासज्य ये लाभसत्काराध्यसिताः कौसीद्यलाभसत्कारपिण्डपातानुरक्ता तेषां तत्रानुरक्तिविसंयोगार्थं द्वादशस्थानमधिकृत्याह- यश्च खलु पुनः सूभूते, स्त्री वा पुरुषो वा इत्यादि ।

(१६३)
अनेन चासारेऽनेकशतसहस्रदुःखैकस्थानतुच्छात्मभावे तस्मिन्स्निहयनेतावच्छरिरपरित्यागेनापि यत्पुण्यं न प्राप्तम्, तदन्तरायकरत्वात्तस्मिन्कायजीविते निरपेक्षचित्ततया सर्वात्मनास्मिन्(धर्मपर्याये) योगः करणीय इति परिदिपितं । अनेनार्थतः कौसीद्यादयो विपक्षत्वेन दर्शिताः । तत्प्रहाणाय सद्धर्मसमादानाय च छन्दः प्रणिधानञ्चापि निर्दिष्टे । इतो धर्मपर्यायातित्युपलक्षणमात्रोक्त्या समस्तमहायानश्रवणादीनि आबध्यन्ते । बहुतरं पुण्यं इत्यनेन आदार्यमुक्तं ।

धर्मवेगेन इति धर्मश्रद्धाबलेनेत्यर्थः । आर्यसुभूतिः अश्रूणि प्रामुञ्चत्तदपि भगवतोऽधिष्ठानेनान्येषु कुसीदेषु जनेषु अद्भुतमहायानधर्मस्याभिधानेन परमश्रद्धोत्पादार्थे द्रष्टव्यं । तस्माद्हस्तेन अश्रूणि प्रमृज्य भगवन्तमेतदवोचताश्चर्यं भगवन्, यावदयं धर्मपर्यायस्तथागतेन भाषितः इत्याह । यावदिति कारित्रविशेषः । यावता प्रकारेण देशानार्हास्तान्बोधिसत्त्वानुपदिशन्त्विति वाक्यार्थः ।

कस्मादित्याकाङ्क्षायां यतो मे ज्ञानमुत्पन्नं इत्यकथयत् । यतः इत्यार्यसत्यगोचरज्ञानोत्पादमारभ्य एतत्पर्यन्तं धर्मपर्यायस्य परमपुण्यफलस्य यथोक्ता देशना श्रावक-प्रत्येकबुद्धनामगोचरा नैवं श्रुतपूर्वेत्यर्थः । एतेन (१६४) दौर्लभ्यं प्रोक्तं । एवं विशिष्टं पुण्यं श्रुत्वा येषां वीर्यमारभ्य प्रवृत्तानामस्मिन्धर्मे यथारुतसंज्ञा भवति तेषां तद्दोषपरिजिहीर्षया परमेणाश्चर्येण इत्यवोचत् । विपुलपुण्यान्युत्पादयतोऽधमपुरुषस्य तादृग्दुष्करश्रद्धाधिमुक्तितोऽत्यन्तगम्भीरपुद्गल-धर्मनैरत्म्याधिमुक्तिश्च ममेव पुद्गलनैरात्म्यमात्रशुद्धज्ञानेन, परमेण ते आश्चर्येणं समन्वागता भविष्यन्ति । भूतसंज्ञां

इत्यविपरीतार्थसंज्ञाम्, न तु शब्दाभिनिवेशेनेदं भूतत्वमिति संज्ञा । एवमत्र परमार्थभिप्रेत्य सर्वधर्मनिःस्वभावत्वं निर्दिष्टम्, न तु संवृतिम्, निःस्वभावताया अभावात्तत्र । तस्मान्न दर्शनदिना विरोध इत्यभिप्रायः ।

ननु भूतसंज्ञायां सत्यां, संज्ञाया अपि सत्त्वं परमार्थतः स्यात्, असत्सु च संज्ञेयेषु संज्ञाया अप्यभावः प्रसज्येत, तस्मात्कथं परमार्थतः सर्वधर्मनिःस्वभावत्वं सिध्येदित्युपालम्भं विचिन्त्य तत्कस्य हेतोः? इत्यवोचत् । या चैषा भगवन्, भूतसंज्ञा इत्युअदतरत् । संज्ञानाम न काचन, एकानेकस्वभावेन वियोगात्, परमार्थतः सा असंज्ञैव । अत एव नोच्यते भूतसंज्ञेयं भूतसंज्ञात्वेनेति दर्शितम्, यतो ह्यविचाररमणीयमात्रतः विद्यते तस्मात्तां तथागतो भाषते भूतसंज्ञा, अन्यथा सर्वथाभावान्न भाषेत । ततः परमार्थव्यवस्थायां कथं योगसमापत्त्या प्रतिपत्तव्यम्, कथं च विक्षेपो निग्रहीतव्य इत्युभयं दर्शितं गाम्भीर्यञ्चापि निगदितम्, अध्यारोपापवादान्तावपि परिह्रतौ ।

तेषु कुसीदेष्वेवाश्चर्योत्पादनार्थं न मम भगवन्, आश्चर्यं यदहमिमं धर्मपर्यायं भाष्यमाणमवकल्पयामि, अधिमुच्ये, येऽपि ते भगवन्, सत्त्वा भविष्यन्त्यनागतेऽध्वनि पश्चिमे काले पश्चिमे (१६५) समये पश्चिमायां पञ्चशत्यां ये इमं भगवन्, धर्मपर्यायं उद्ग्रहीष्यन्ति, धारयिष्यन्ति, पर्यवाप्स्यन्ति, ते परमाश्चर्येण समन्वागता भविष्यन्ति इत्याह ।

अत्रायं सामान्येन समासार्थः- अनागते सद्धर्मविप्रलोपकाले ये बोधिसत्त्वा इमं धर्मपर्यायं धारयिष्यन्ति, न ते पुद्गलादिभिर्गृहीता भविष्यन्ति, मय्यप्येवं सम्भावनायां सद्धर्मोत्थानकालेऽपि युष्माकमेतादृशप्रतिपत्त्यभावे इदमत्यन्तं लज्जास्थानं तत्स्यादित्युच्यते । तत्रऽअहम्ऽ इति पद्गलनैरात्म्यं बोध्यते, इमं इत्यनेन पुद्गलधर्मनैरात्म्यं प्रकाश्यते, भाष्यमाणं इति तु साक्षात्प्राकाश्यमानं भगवता, अवकल्पयामि इति प्रसादाकारः प्रसन्नता संदर्श्यते, अधिमुच्ये इति सम्प्रत्ययश्च, ते सत्त्वाः इत्यनेन भगवन्, अनागते कल्पे भाविनः । अत्रोद्ग्रहीष्यन्तीत्यादीनि यानि पदानि तानि पूर्वमेवोक्तानि ।

तच्चैवं निरुच्यते- पुद्गलनैरात्म्यमात्रमवगन्तुर्मम भगवतः सकाशात्साक्षात्श्रवणबलेन यद्धि नैरात्म्यद्वयप्रतिपादकेऽस्मिन्धर्मे प्रसादसम्प्रत्ययमात्रं जातं तन्नैवाश्चर्यं । ये भगवन्(तेषु) कल्पेषु अस्मिन्[धर्मे] धारणादिक्रमेण ईदृशं धर्मपर्यायमधिगम्य पर्यवाप्स्यन्ति ते परमाश्चर्येण समन्वागता भविष्यन्ति । भगवन्, (तेषु) कल्पेषु बहुलतया महायानविप्रकृष्टा भवन्ति, तेषु (१६६) श्रद्धोत्पादस्त्वतिदुर्लभ इत्यभिप्रायः ।

एतेन कौसीद्यं प्रहाय सद्धर्मग्रहणादौ छन्देन प्रणिधानेन च स्थातव्यमित्यादर्शितं । न केवलं तेषु आगमयोग एवापितु (तेषु) प्रतिपत्तिसम्पदमपि दर्शयितुं अपि तु खलु पुनर्भगवनित्यवोचत् । आत्मा इत्यादिवचनम्, तूपलक्षणम्, अतस्तेषां धर्मसंज्ञा (अपि) न प्रवर्तिष्यते, द्वयोर्नैरात्म्ययोर्युगपदधिगमात् ।

यद्यनात्मादिकं सत्तदा संज्ञापि तत्र नियमेन प्रवर्तयेदिति विचिन्त्य तत्कस्य हेतोः? इति पृष्ट्वा आत्मसंज्ञा इत्युदतारीत् । यथात्मेत्याद्युक्तस्तथा अयमहमित्ययात्मसंज्ञा या सर्वजनप्रसिद्धा, तस्या अपि

परिक्षाक्षमत्वादकिञ्चनत्वे सति आत्माद्यनुभवाभावादसत्याः का कथा । अनेन तावद्योगसमापत्तिः निर्दिष्टा ।

ननु चासत्त्वे सत्यात्मादेस्तद्विपर्ययेण नात्मसंज्ञा प्रवर्तिष्यत इति कुत इत्याभ्यन्तरोत्थितं प्रश्नं विचार्य तत्कस्य हेतोः? इत्यवोचत् । सर्वसंज्ञापगता हि बुद्धा भगवन्तः इत्युदतरत् । अत्रायमर्थः- समस्तभावानां यथावत्तत्त्वाधिगमेनऽबुद्धा भगवन्तःऽ इत्युच्यते । परमार्थतः कस्यापि संज्ञेयस्याभावात्, न कुत्रापि ते संज्ञा प्रवर्तते, अन्यथा विपर्यासः स्यात् । बोधिसत्त्वास्तु बुद्धानुनुशिक्षामनुवर्तन्ते, अन्यथा कथं तत्पदं प्राप्नुयुः, तस्मात्बुद्धैर्भगवद्भिर्यथा सर्वसंज्ञापगतत्वं शिक्षितं तथा बोधिसत्त्वैरपि शिक्षितव्यं । तस्माद्ये बोधिसत्त्वास्तस्यामनुशिक्षन्ते तेषामात्मादिसंज्ञा नियमतो न प्रवर्तते ।

(१६७) एवमेतदिति विनेयानां निश्चयापादनार्थं स्वयमभ्युपगम्य भगवता द्विरुक्तं । इतः पूर्वमनारब्धवीर्यानधिकृत्याभिहितं । सम्प्रति पुद्गला धर्मगाम्भीर्यं श्रुत्वा त्रस्यन्ति । अतः प्रथमतरमनारब्धवीर्याणां तेषां अनारब्धवीर्यत्वापनयनार्थं ये सत्त्वाः इत्याद्याह । सन्त्रासे सति नारभन्ते वीर्यम्, श्रावकयानेऽस्मिन्भगवता धर्ममात्रमिदं पुद्गलासत्त्वमित्युक्तम्, महायाने तु तदपि धर्ममात्रं मिथ्येति देशितम्, तस्मादनादिकालीनसहजात्मदृष्टिसम्प्रयुक्तान्तःकरणा अभावितात्मानः पुद्गलनैरात्म्यं श्रुत्वा नास्त्यहमिति त्रसिष्यन्ति । तन्निषेधार्यं नो त्रसिष्यन्ति इति देशितं । ये धर्ममात्रेऽभिनिविष्टास्ते धर्मनैरात्म्यदेशनाश्रवणकाले सन्त्रसिष्यन्ति, यद्धर्ममात्रं तस्याप्यसत्त्वेऽअहो ! न मया भाव्यम्ऽ इति मत्वा दशदिगवलोकनेनापि शरणाभावात्सन्त्रासे तदपाकरणाय न सन्त्रसिष्यन्ति इत्युद्दिष्टं । चिन्ताकाले उभयाभावयोगस्याशक्यत्वात्सन्त्रसिष्यन्तिऽकथमस्माभिर्नैरात्म्यद्वयमधिगन्तव्यम्ऽ इत्यादिमसन्त्रासापसारणार्थं न सन्त्रासमापत्स्यन्ते इत्युक्तं ।

अन्ये तावन्नैरात्म्यद्वयानवबोधाद्यो हि त्रासो मृदु-मध्याधिमात्रात्मकः स एभिस्त्रिभिः पदैः यथाक्रममुदीरित इत्येवं मन्यन्ते, अपरे तु त्रिविधस्त्रासः श्रवण-मनन-भावनाकाले भवतीत्यभ्युपगच्छन्ति । सम्प्रति लाभसत्कारेषु वीतरागत्वात्ऽते परमाश्चर्येण समन्वागता भविष्यन्तीति ।ऽ श्रोतुकामानां हिताय स्वयं पूर्वं प्रश्नमुथ्याप्य तत्कस्य हेतोः? इत्यवोचत् । परमपारमितेयं इत्युक्तं । प्रज्ञापारमितेयं बोधेरासान्नहेतुः । अस्या अभावेन दानादिपारमितानामभावात्सर्वपारमितासु श्रेष्ठा । न केवलं मयैवेयं परमा परमा प्रोक्ता, (१६८) अपि तु सर्वबुद्धैरपीयं परमेत्युक्तेति दर्शनार्थं यां च परमपारमितां इति निगदितं ।

अनेनऽएकबुइद्धेन देशितमपि अविपरीतार्थत्वेन गृह्यते सर्वबुद्धैकाभिप्रेतत्वे खलु किमुच्यताम्ऽ इत्येवं दीपितं । (यदि) अस्माभिः सर्वैः परमा संसाधिता स्यात्, कथं न (वयं) परमेणाश्चर्येण समन्वागता भविष्यामः? अनेन परमत्वदर्शनेन ह्रियः द्वितीयं स्थानं निर्दिश्यते, तथा हि- धर्मोऽयं (एतावान्) श्रेष्ठस्तथापि त्वं यल्लाभसत्काराध्यवसितः प्रमादेन स्थितस्तदतीव लज्जाजनकमित्युच्यते । अनेन चित्तप्रग्रहः सन्दर्शितः ।

१३. दुःखाधिवासन-स्थानं ः

एवं ह्रीस्थाने देशितेऽपि ये दुःखेऽक्षान्त्या वीर्यातिशयमारब्धुं नोत्सहन्ते, तेषां दुःखाक्षान्तेर्व्यपगमार्थं त्रयोदशस्थानमधिकृत्याह अपिअ तु खलु पुनः सुभूते इत्यादि । किमत्र क्षान्तिः? केन लक्षणेन सा क्षान्तिर्ज्ञायते? तस्याः य आकारः, यथा वाकारः, यश्चाक्षान्तेः प्रतिपक्षः सोऽनेन स्थानेन दर्श्यते । कीदृशी क्षान्तिरिति चेत्? सर्वधर्मानुपलम्भस्वभावः, अतः या तथागतस्य क्षान्तिपारमिता सैव अपारमिता इत्युक्तं । परमार्थतः का क्षान्तिः, येन क्षान्तिः, यत्र क्षान्तिः, यश्च क्षम्यः, या च क्षान्तिः, तेषां सर्वेषामनुपलम्भात्(१६९) सैव अपारमिता । एवं परमार्थतोऽनुत्पन्नत्वात्नास्ति तत्र पारं गतेत्यभिसन्धिः । अनेन तस्याः क्षान्तेः स्वभावेनानुत्पन्नत्वं गाम्भीर्यं चापि दर्शितं ।

एवं सर्वधर्मानुपलम्भमनसिकारेण कुतः बोधिसत्त्वानां क्षान्तिरिति विचिन्त्य तत्कस्य हेतोः? इति ज्ञापकहेतौ पृष्टे यदा सुभूते इत्याद्यत्तरमाह । अङ्गानि हस्तपादादीनि, प्रत्यङ्गानि अङ्गुल्यादीनि । नापि मे काचित्संज्ञा इति परदेहसंज्ञा, शस्त्रसंज्ञा, छेदसंज्ञा, परसंज्ञा, क्षान्तिसंज्ञादयश्च । अनेन सर्वधर्मानुपलम्भोऽभिहितः ।

ननु असत्याञ्च कस्याञ्चित्संज्ञायां मूर्च्छावस्थावद्चित्ताभावो भविष्यतीति चेत्? तत्र नापि असंज्ञा वा बभूव इत्याह । तस्मिन्काले सर्वधर्मनैरात्म्यावबोधकं योगिज्ञानं तथ्यसंवृतिस्वभावभिप्रेतं । तच्च कथमिति चित्तगतं प्रश्नं विकल्प्य स्वयं तत्कस्य हेतोः? इत्युक्त्वा सचेत्सूभूते इत्युदतरत् । व्यापादसंज्ञापि अस्यायमभिप्रायः- यत्र आत्मसंज्ञा, तत्र नूनं तन्मत्रेणात्मस्नेहो जायते । एवमात्मस्नेहसम्प्रयोगेऽवश्यं स्व-परविकल्पौ जायेते । तेनैवं य आत्मोपकारित्वेनोपादत्तास्तेष्वात्मीयत्वं परिकल्प्यते, इतरेषु च परत्वं कल्प्यते । अत एवात्मानुरूपा प्रवृतिः । तत्रात्मनि आत्मीयेषु च प्रवृत्तौ अनुरागः, तद्विपरीतेषु च द्वेषः । ताभ्यां सम्बद्धः समस्तो दोषराशिः सम्भवति । अत एवोक्तं ः

आत्मनि सति परसंज्ञा स्व-परविभागात्परिग्रहद्वेषौ ।
अनयोः सम्प्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ।। इति ।।

यत्र व्यापादादिदोषौस्तत्र कथं क्षान्तिवादीति प्रसेत्स्यति, येन क्षान्तिबलेन कलिङ्गराजा एव सत्त्वः नरकं गमिष्यतीत्यभिप्रेतं । अनेन कृतापकारेऽपि (१७०) सति निर्विकारतया नियतं व्यापादादिसम्भवाभावतया आत्मादिसंज्ञाव्यपगमहेतुतया च ईदृश्याः क्षान्तेर्ज्ञानमादर्शितं ।

अनेनैव च त्रिविधाः क्षान्तयोऽपि तावन्निर्दिश्यन्ते । अत्र कलिङ्गराजा इत्यनेन अपकारमर्षणक्षान्तिः परिदीपिता, अङ्ग-प्रत्यङ्ग इत्यनेन दुःखाधिवासनक्षान्तिः मे तस्मिन्समये इत्यादिना च धर्मनिध्यानक्षान्तिः । अनेन धर्मपुद्गलविकल्पयोर्विपक्षतया निर्देशेन विनेयास्तत्प्रहाणे यथोक्तक्षान्त्युत्पादे सम्यग्ग्रहणे चावतरन्ति । तदेवम्, विनेयजनाःऽयदा भगवानेव बोध्यर्थमेवंविधां परां क्षान्तिं भावितवान्, तत्कथमस्माभिर्न भावनीया, दुष्करकर्मण्यननुष्ठिते दुर्लभपदं नाधिगम्यतेऽ इति

विचारयन्ति । ततस्ते विनेयास्तस्यां प्रओत्साहयन्ते । अङ्ग-प्रत्यङ्गेति निमित्तमात्राभिधानेन सर्वदुःखाधिवासनक्षान्तिः समुदीरीता ।

सम्प्रति यदाकारा सा क्षान्तिः, तथा दर्शयितुम्- अभिजानाम्यहं सुभूते इत्याह । तदपि कलिङ्गराजा मे अङ्गप्रत्यङ्गमांसान्यच्छेत्सीतित्येतत्प्रसङ्गप्राप्तम्, साक्षान्नोक्तं । सा च क्षान्तिः द्विविधा दीपितानिरन्तरपरापकारदुःखविषयिका परापकारासहयदुःखविषयिका च । तत्र निरन्तरदुःखविषयस्तु यत्पञ्चजातिशतानि इति । एतेन अस्यौदार्यं अभिहितं । असहयदुःखविषयस्तु यतङ्ग-प्रत्यङ्गानीति कथितं ।

त्रिविधं (हि) दुःखं तावदसहयं वस्तु, तद्यथा- संसारदुःखं सत्त्वप्रतिकूलप्रवृत्तिदुःखं परिभोगवैकल्यदुःखं च । तत्र प्रथमस्यासहयवस्तुनः प्रतिपक्षत्वेन तस्मात्तर्हि इत्युक्तं । समस्तेनानेन असहयप्रहाणात्बोधौ छन्देन (१७१) प्रणिधानेन च स्थातव्यमिति दर्शितं । बोधिचित्तोत्पादे सति न केनापि संसारदुःखेन स्पृष्टो भविष्यतीत्यभिप्रायः । बोधिचित्तोत्पादेऽपि आत्माभिनिविष्टतया त्रिविधदुःखसंज्ञाभिः सन्त्रस्य कदाचित्पुनर्नोत्पादः स्यादतः सर्वसंज्ञा विवर्जयित्वा इत्याह । सर्वसंज्ञाश्चात्र आत्मादिसंज्ञाः त्रिविधदुःखसंज्ञाश्च । रूपाद्यभिनिवेशेन श्रावकादिवत्संसारं परिकल्प्य तद्दुःखसन्तप्ताः न कदाचिदपि बोधिचित्तमुत्पादयन्ति, अतः न रूपप्रतिष्ठितं इत्याद्यूक्तं ।

रूपादिषु सताभिनिवेशो हि तत्र प्रतिष्ठित इति पूर्ववदत्राप्युक्तः, न चात्रपुनरुक्तिरपि । अनेन असहयवस्तुनः प्रतिपक्षोऽभिहितः । पूर्वेण तु पारमितायां योगः करणीयः । अत्र विनेयैः नाधर्मप्रतिष्ठितं इति शेषः । अनेन तावदभावेऽभिनिवेशः प्रतिषिध्यते । न क्वचित्प्रतिष्ठितं इत्यनेन रूपादिषु नाममात्रसत्ताभिनिवेशः प्रतिषिध्यते, योगसमापत्तिश्चोदीरिता भवति ।

किं रूपादीनां सतां तत्सत्त्वस्य प्रहाणार्थम्, यदुत असतां वितथाभिनिवेशस्य प्रहाणार्थं प्रतिषेधः क्रियते? इति चित्तोत्थितं प्रश्नं वितर्क्य तत्कस्य हेतोः? इत्यपृच्छत् । उत्तरार्थमाह- यत्प्रतिष्ठितं तदेवाप्रतिष्ठितं इति । अत्रायमर्थः- अनादिकालस्तच्चितं रूपादिषु भावाभिनिवेशबलेन रूपादौ प्रतिष्ठितम्, यः खलु सत्याभिनिवेशः, स तस्य रूपादिवस्तुनोऽभावात्परमार्थतो न प्रतिष्ठितः । तस्मादेव इत्यनेनोपसंहारेणात्र द्वितीये पक्षे प्रतिस्थितत्वमेव दर्शितं भवति । दानशब्देनात्रापि पूर्ववत्षट्पारमिता एवाभिप्रेताः ।

द्वितीयासहयवस्तुन प्रतिपक्षत्वेन अपि तु खलु पुनः सुभूते इत्याद्याह । समस्तेनानेन बोधिसत्त्वा येषामर्थायातिदुष्करपारमितायोगमारब्धुमुत्सहन्ते, तेऽपि सत्त्वा यदि परमार्थतो न स्युः, सत्त्वसंज्ञापि परमार्थतो न स्यात्, कथं ते तथाविधेषु मिथ्याप्रवृत्तेषु सत्त्वेषु खिन्ना भवेयुः (१७२) इत्यादर्शितं । तत्र सत्त्वं संज्ञां च प्रतिषिध्य नैरात्म्यद्वयमुदीरितं । सर्वसत्त्वानामर्थाय इत्यनेनात्रौदार्य दर्शितं । अवशिष्टेन सकलेन गाम्भीर्यं सन्दर्शितं ।

एवं तावद्युक्त्या क्षान्तिर्युज्यत इति निर्दिश्य साम्प्रतं तथागते सम्प्रत्ययोऽपि युज्यत इति निरूपयन्भूतवादी इत्याद्याह । प्रथमं उद्देशः, शेषः विधेयं । अथवा सत्यचतुष्टयमुद्देशः, क्रमशः

अभिसम्बध्यते । अथवा भूतवादी इति साध्यम्, तथागतः इति ज्ञापकनिर्देशः । यथान्ये बुद्धा भगवन्तः क्लेशज्ञेयावरणानि प्रहीणवन्तस्तथैव तथागतोऽप्ययं गतः प्राप्तः, तेन तथागतः । तस्मादविपर्यस्तत्वेन भूतवादीति, विपरीतदेशनायाश्च हेतोरावरणस्याभावः सिध्यति हेत्वनुपलब्धेः ।

तथागत एवायमिति कथं सिध्यतीत्याह- सत्यवादी इति ।ऽसत्यम्ऽ चतुरार्यसत्यलक्षणम्, तस्य यो वादी, स तथागत इति निर्धार्यते । अत्यन्तपरोक्षार्थस्तु सर्वथा सम्यक्कथयितुं न शक्यते, यथोक्तम्-

परोक्षोपेयतद्धेतोस्तदाख्यानं हि दुष्करं ।

(१७३)
अयं सत्यवादी सत्यं केन रूपेण जानातित्याह- तथावादी इति । स वस्तुतत्त्वमविपरीततया यथावद्वदतीति तथावादी । स हेयोपादेयतत्त्वं सोपायं यथास्थितं तथैव भाषतेऽतः स कथं न सत्यवादी स्यादिति । एवंभूतेऽपि तद्देशितानि चत्वारि सत्यानि किं तथैव प्रतिष्ठितानीति? इत्यत आह- न वितथवादी इति । यतोऽविपरीतप्रमाणोपपन्नानि, न प्रमाणबाधितानि उक्तान्यतः सत्यानीत्यर्थः एतेन समग्रेण कार्यकारणेन भगवतः प्रामाण्यं साधितं । अत एवोक्तम्-

तायात्तत्त्वस्थिराशेषविशेषज्ञानसाधनं ।

एकस्यापि भावस्वभावस्य परमार्थतोऽसिद्धत्वादेकमपि सत्यं तावद्दुःसाध्यम्, किमिति सत्यचतुष्टयमिति चतुःसत्याभिधानाच्च भूतवादीति ।

एवं भगवताऽमायोपमाः पञ्चस्कन्धाःऽ इत्युक्ते सति कथं तेषां दुःखसत्यस्वभावत्वम्, दुःखस्यापि परमार्थतोऽनृतत्वात्तत्समुदयनिरोधयोप्यसत्त्वमेव, अत्यन्ताभावभूते शशशृङ्गादौ तावत्तौ (समुदय-निरोधौ) न सम्भवतः । निरोधस्य त्वभावात्तत्प्रापको मार्गोऽपि नैव परमार्थतः, गम्याभावे नैव गमकोऽपि । तथोक्तम्-ऽबोधिं प्रतिष्ठाय एकस्यापि सत्यस्य सिद्धिर्न दृष्टा, किमिति चतुर्णाम्?ऽ इति देशनावत् ।

एतत्प्रविचिन्त्य ये भूतवादिनि शब्दशोऽभिनिविष्टास्तेषामध्यारोपान्तपरिहारार्थं अपि तु खलु पुनः सुभूते इत्याद्याह । न तत्र सत्यं इति परमार्थतः कस्यचिदपि स्वभावस्यासिद्धेः । न मृषा इत्यत्र सत्यव्यवच्छेदेन (१७४) स्थितत्वात्तद्व्यवच्छेद्यत्वाभावाद्येन मृषाअत्वं भवेत्तन्मृषा । अथ वा न सत्यं इति यथा मायोपमा मृषा ज्ञानरूपाः । अविचाररमणीयमात्रतया स्थितत्वाद्न मृषा इति । अनेन तावदन्तद्वयप्रतिषेधेन मध्यमा प्रतिपदेव निर्दिश्यते । श्रावकाणामात्माभिनिवेशस्य प्रहाणार्थं पुद्गलनैरात्म्यांशमात्रेण चत्वार्यार्यसत्यानि देशितानि, न तु सर्वेभ्य इत्यविरोधः ।

कायादिकमुपलभ्य तदर्थको दानं ददाति, अनुपलभ्य अतदर्थको वा, तयोः को विशेष इति यच्चिन्तनं ततृतीयस्यासहयवस्तुनः प्रतिपक्षत्वेनाह तद्यथापि नाम इत्यादि । यः काय-भव-भोगात्मकवस्तुषु सुखमात्रत्वेनाभिनिविश्य (सत्यत्वेनैवाभिनिविश्य) तदर्थिकस्तत्र पतित्वा दानं ददाति, स अन्धकारप्रविष्टपुरुषसदृशः, सतोरपि चक्षुषोः वस्त्वर्थानुपलम्भेन हेयोपादेयार्थानभिज्ञतया विपर्यस्तार्थेषु

समस्तदुःखस्थानेषु पतितो भवति । ततः बोधिसत्त्वा महासुखभोगात्प्रच्युता भविष्यन्ति । तद्वियोगेन श्रावकादिवत्दुःखसन्तप्ततया बोधेर्व्यावृता भविष्यन्ति ।

यो वस्त्वपतिओतो दानं ददाति, कायादिवस्त्वनुपलभ्य तदनर्थी भूत्वा दानं ददाति तत्तु यथापि नाम चक्षुष्मान्पुरुषः नानाविधानि रूपाणि पश्येत्दृष्ट्वा च हेयस्य हानं उपादेयस्य चोपादानमिव । (अथ) तदपि असत्यरुणोदये कदाचिन्न दृश्यत इति? सूर्येऽभ्युद्गते इत्याह । सूर्येऽभ्युद्गतेऽपि अन्धकारपूर्णेषु गृहादिषु न पश्यतीति मत्वाह प्रभातायां इति । (१७५) प्रभातेति शब्दः अन्धकारद्योतनार्थमुक्तः तस्मान्निरन्धकारायां दिशायामित्यर्थः ।

तत्सामग्र्येऽपि योऽन्धः, स कदाचिदपि न पश्यतीत्याशङ्कायां चक्षुष्मानित्याह । एवमवस्तुपतितो बोधिसत्त्वो द्रष्टव्यः, सः अविद्यातामिस्रप्रबोधेन ज्ञानसूर्याभ्युद्गमेन च नानाविधानि ज्ञेयानि यथावत्सम्पश्यति, विपर्यस्तवस्तूनि समस्तदुःखस्थानानि हेयदुःखानि चापि मृषात्वात्परिवर्जयति, समस्तसुखस्थानस्यानुरसम्यक्सम्बोधिलक्षणस्योपादेयस्योत्तमपदस्यापि कामनया तत्र प्रवर्तते ।

तस्माद्बोधिसत्त्वा महाभोगसम्पदनुप्राप्य अनुत्तरसुखेन कायं स्थिरीकृत्य बोधेरविनिवृत्ता भवन्तीत्यभिप्रायः, अत एव अविनिवृता इति । पूर्वं त्वालम्बनमात्रेण तस्मिन्स्थितिरादर्शिता, अत्र तु आलम्बनपूर्वकं तस्मिन्ननुरागलक्षणे पतनं । तस्मादत्र पतित इत्युक्तम्, पूर्वं तु प्रतिष्ठित इत्युक्तं । अनेन सकलेन चित्तप्रग्रहः परिदीपितः ।

१४. ध्यानसास्वादविरति-स्थानं ः

अनेन प्रकारेण क्षान्तिप्रवृता अपि ये ध्यानसमास्वादयन्तस्तत्रैवासक्ता ज्ञानसम्भारपारिपूरये हेतुभूतं महायानधर्ममनारब्धास्तेषां ज्ञानसम्भारवियोगपरिहारार्थं चतुर्दशस्थानमधिकृत्य अपि तु खलु पुनः सुभूते इत्याद्याह । स्थानेनानेन ध्यानरसास्वादापगमाय पञ्चभिः प्रकारैः सद्धर्मं प्रति वीर्यार्थं गुणविशेषः परिदीपितः, (यथा)- १. तथागतानुभावः, २. विशिष्टपुण्यसञ्चयः, ३. धर्मतत्साधनयोः प्रशंसनम्, ४. देवादिभिः सत्कारः, ५. पापपरिशोधनं च ।

(१७६)
तत्र तथागतानुभावस्तु ज्ञातास्ते तथागतेन इत्यादि यदाह । उद्ग्रहीष्यन्ति इत्यादिपदानां व्याख्यानं पूर्ववदेव । भगवान्हि सर्वं विजानातीति सर्वज्ञः द्रष्टा च । तत्र किं महदाश्चर्यं तेष्वित्यन्वेषणायां पुण्यसञ्चयवैशिष्ट्यमादर्शयितुमाह सर्वे ते सत्त्वाः इति । अप्रमेयपुण्यस्कन्धानां प्रसवनाद्ज्ञातास्ते भाग्यवन्त इति वाक्यशेषः ।

किं च तावत्पुण्यस्कन्धस्य वैशिष्ट्यम्, येन (सः पुण्यस्कन्धः) अपरिमितो भवतीति विचिन्त्य विशिष्टपुण्यसंग्रहं दर्शयन्पश्च खलु पुनः सुभूते ! स्त्री वा पुरुषो वा इत्याद्याह ।

सूर्य-प्रभा-पृथ्वीजलाद्यवस्थाविशेषः पूर्वाह्णः । एवम्भूतेष्ववस्थाविशेषेष्वेव कालः इति प्रज्ञप्यते, न तु विशिष्टत्वेन परिकल्पित इवेति दर्शयितुं कालशब्दस्तत्सामान्याधिकरण्येन विशेष्यते । अन्यथैकात्म्यादयं पूर्वाह्ण इत्यादिभेदा न स्युः । विशेषणान्तरैर्भेदेऽभ्युपगते स एव विशेषः सूर्याद्यवस्थानां विशेषः पूर्वाह्णादिव्यवहारप्रज्ञप्तीनां च हेतुः स्यात्, अकिञ्चित्करत्वे किमदृष्टसामार्थ्येन कालेन प्रज्ञप्तेनेत्यभिप्रायः । न च स मन्दतीव्रबुद्धयादिलिङ्गवानपि युज्यते, मन्दादिबुद्धीनां तद्धेतुतः समुद्भवे क्रमोणोत्पत्तिविरोधाद्, एतच्च पूर्वं दर्शितमेव । बाधकप्रमाणस्यापि प्रागेवात्मदूषणप्रसङ्गे दर्शितत्वात्किमधिकेन ।

(१७७)
सामान्यजनैः सङ्केतवशेनोत्पन्नस्तथाविधः प्रणिनामवस्थाविशेषः कालः इति व्यवहारे प्रज्ञप्यते, न तु शब्दार्थसम्बन्धप्रज्ञप्तिवशेनेति दर्शयितुं समये इति शब्देन विशेष्यते । कस्यचिदेकस्याप्यकथनेन यथोक्तदेशनाभिप्रायस्य प्रतिपादनाभावात्पदत्रयमुक्तं । सङ्केतविषयत्वेन प्रज्ञापकं शब्दमारोप्य समानाधिकरण्यं कृतं । ध्यानरसास्वादविरागायात्रेदमुक्तं । पूर्वं देयस्य एवंविधस्य च कालस्यानिर्देशान्नैव तावत्पुनरुक्तिदोषः ।

अयमेव ततो निदानं बहुतरं पुण्यस्कन्धं प्रसुनुयादप्रमेयमसंख्येयं इत्यनेन औदार्यं परिदीप्यते । संख्या-द्रव्यकाल-विशेषैर्विशिष्टं दानोद्भूतं पुण्यमभिभूयते । एवं तावत्गङ्गानदीबालुकासमान इति संख्याविशेषं दर्शयति । आत्मभावः इति दुरवगाहो द्रव्यविशेषः । कल्पकोटिनियुतशतसहस्राणि इति कालविशेषः । सा च कल्पकोटिः नियुता, सापि शतसहस्रेति पदेन युक्ता ।

एतत्कथं ज्ञातव्यम्? इति धर्मस्तुतिवैशिष्ट्यं दर्शयितुं अपि तु खलु सुभूते इत्याद्याह । अचिन्त्योऽयं धर्मपर्यायः अत्यन्तगम्भीरः सर्वधर्माणां निस्वभावतालक्षणः तथागतैः प्रत्यात्मवेदनीयः, श्रावकादिभिरपरैश्चापि (१७८) चिन्तयितुमशक्यो ह्ययत्र निर्दिष्टः । अतुल्यः इति अन्यत्र एवंविधस्य अदर्शनात्, एतत्तुल्यस्य विशिष्टस्य वाभावात्, तुल्यस्य अधिकस्य वाभावेन अचिन्त्यहेतुतोऽचिन्त्यमेव फलं सम्भवतीत्युक्तं । कथं अतुल्य इति चिन्तायामाह श्रेष्ठयानसम्प्रस्थितानां इति । अतिशयेन पारं गतस्तु श्रेष्ठ इति । श्रावकादीनां अयं धर्मपर्यायः इत्युक्तं । अग्रयानं इत्यग्राणां यानं वा अग्रं चेदं यानमिति वा पदविग्रहः । ये तत्र सम्प्रस्थितास्ते तथोच्यन्ते । एवमेव श्रेष्ठयानसम्प्रस्थितनामित्यपि तस्समानमेव । तौ तावत्पर्यायौ । पर्यायदेशनाभिप्रायस्तु विनेयजनोपकारः, येन कतिपये भव्या भवन्ति ।

इतरयानान्यपेक्ष्य श्रेष्ठ इति केचित् । समस्तक्लेशज्ञेयावरणविशुद्धया वा श्रेष्ठ अथवा अग्रमिति परमं । प्रत्येकबुद्धयानमपि श्रावकयानापेक्षया परमिति विचारणायामाह- श्रेष्ठयानसम्प्रस्थितानां इति । अत्यन्तं प्रशस्तगमनात्श्रेष्ठ इत्युक्तं । श्रावकाद्येनेकयानेभ्योऽतिशयेन प्रशस्यत्वादत्र श्रेष्ठः इति शब्द प्रयुक्तः । तच्च महायानमित्येव । श्रावकादिनामभव्यत्वाद्धर्मदेशनेयं बोधिसत्त्वेभ्य एवोक्ता । तेन सिद्धोऽयं धर्मपर्यायोऽतुल्य इति । तथागतेन भाषितः इत्यन्येषामगोचरत्वात् । धर्मपर्यायोऽयं इत्यादिभिः यथोक्तार्थान्प्रसाध्य उपसंहृत्य च तत्प्रतिपत्तुं विशेषस्तुतिः सन्दर्शिता ।

यतो हि धर्मपर्यायोऽयमचिन्त्योऽप्रमेयश्च तस्माद्विपाकोऽप्यस्याचिन्त्य एव । ततः ये इमं धर्मपर्यायं धारयिष्यन्ति इत्यादि तु सिद्धमेवेत्यर्थः । अप्रमेयं इत्युद्देशः, शेषस्तान्निर्देशः । तत्र अचिन्त्यं इति चिन्ताविषयातिक्रान्तत्वेन अननुमेयत्वात् । अतुल्यं इत्यप्रतिसमं । अमाप्यं इति सर्वसत्त्वप्रयोगेऽपि मापयितुमशक्यत्वात् । अपरिमाणं इति (१७९) महद्भिर्देशादिभिरप्यपरिमाप्यत्वादाकाशतोप्यधिकं । अथवा सर्वाण्यपीमानि पर्यायान्तर्गतानि । सर्वे ते सुभूते, सत्त्वाः समांशेन बोधिं धारयिष्यन्ति इति बोधिभारोद्वहनं अंशोद्वहनसदृशं । अनेन तावत्सकलेन ध्यानसुखास्वादं परित्यज्य ज्ञानसम्भारपारिपूरिहेतौ धर्मपरिग्रहणादौ छन्दप्रणिधानाभ्यां स्थातव्यमिति दर्शितं ।

कस्मात्खलु श्रेष्ठयानसम्प्रस्थितेभ्यो भगवता भाषितो न त्वन्येभ्यः, किं खलु भगवत्यपि रागो द्वेषश्च इति विचिन्त्य तत्कस्य हेतोः? इत्याह, अतः सुभूते हीनाधिमुक्तिकैः इत्युदतरत् । अनेन खलु भगवति सर्वसत्त्वेषु एकसुतवद्वात्सल्यमिति नास्ति रागो द्वेषो वा । तथापि ये यदा भव्या भवन्ति तदा तेभ्यो देशयन्ति, न त्वन्येभ्यः । अन्यथा उपायानभिज्ञत्वान्नैव भवेद्भगवान्सर्वज्ञः इत्येवं दर्श्यते । हीनाधिमुक्तिकैरिति श्रावकप्रत्येकबुद्धैः । आत्मादिदृष्टिकैः इति तैर्थिकैः । नेदं स्थानं विद्यते इति नास्ति तदर्थमवकाश इति ।

यच्छ्रावकैः प्रत्येकबुद्धैश्चापि श्रोतुं न शक्यते तत्कथं शक्यते पृथग्जनैः श्रोतुम्? यतैर्न श्रोतुं शक्यं तत्कथं शक्यत उद्ग्रहीतुं वा पर्यवाप्तुं वा । अतस्तदसम्भवमित्यर्थः । अनेन तावद्योगसमापत्तावावार्यते ।

यद्येवं कथं तावदार्यसुभूतिना धर्मपर्यायोऽयं श्रोतुं शक्यत इति चेद्? भगवतोऽधिष्ठानेनेति नास्ति दोषः । सर्वप्रदेशेषु यस्मिन्पृथिवीप्रदेशे सूत्रमिदं भाष्यते स एवैकः पृथिवीप्रदेशोऽनुशंसनीय इति प्रतिपादयन्देवदिसत्कारवैशिष्ट्यं दर्शयितुं अपि तु खलु पुनः सुभूते इत्याद्यवोचत् ।

(१८०)
पूर्वं तावद्बाह्यशास्त्राभिष्वङ्गपरिवर्जनार्थमुक्तम्, सम्प्रति ध्यानरसास्वादवर्जनार्थमिति नास्ति पुनरुक्तता, समस्तसंगृहीतार्थाभिधानेऽपि भिन्नप्रसङ्गाभिधानान्नास्ति पुनरुक्ततेति ज्ञातव्यं । पूजनीयः इति छत्रध्वजपताकादिभिः, वन्दनीयः इति नमस्करणीयः, प्रदक्षिणीयः प्रदक्षिणायोग्यः, अत एव पूजनीयत्वादिधर्मैर्युक्तावाद्चैत्यः ।

ननु ईदृशेषु धर्मपर्यायेषु अभ्युद्यतानामपि कथं केचित्परिभूता दृश्यन्त इति चिन्तायां पापपरिशोधनविशेषदेशनाय ये सुभूते, कुलपुत्रा वा कुलदुहितरो वा इत्याद्याह । परिभूता भविष्यन्ति इति परिभाषणभण्डनादिभिर्व्यापन्ना भविष्यन्ति, सुपरिभूताश्च भविष्यन्ति इति वधबन्धनादिभिः पीडिता भविष्यन्ति ।

एवमेते महात्मानः कथं परिभूता भविष्यन्तीति विचिन्त्याह तत्कस्य हेतोः? इति । तेषां सत्त्वानां इत्याद्युदतरत् । पौर्वजन्मिकानि इति पूर्वजन्मनि कृतानि । दृष्ट एव धर्मे इति प्रत्युत्पन्नजीविते ।

बुद्धबोधिं (१८१) चानुप्राप्स्यन्ति इति पापानि परिशोध्य कालान्तरे भावनानिरता न चिरं अनुत्तरसम्यक्सबोधिमभिसम्बुद्ध्य बुद्धा भविष्यन्तीति वाक्यार्थः ।

ततो निदानं बहुतरं पुण्यस्कन्धं प्रसुनुयादप्रमेयमसंख्येयं इति यदाह तत्र केन प्रकारेण अप्रमेयाख्येयावबोधः स्यात्? इत्यत्र अभिजानाम्यहं सुभूते इत्याद्याह । अत्र प्रभावेण बहुतरेण चाप्रमेयमसंख्येयं च परिदीपितं । तत्राभिजानामि सुभूते अतीतेऽध्वन्यसंख्येयैः कल्पैः असंख्येयतरैः इत्यादिना प्रभावः परिदीपतः । अयं तावत्पुण्यस्कन्धस्यैव प्रभावः । एतावता प्रशस्तरो विशिष्टतरः (पूर्वकः) पुण्यस्कन्धोऽप्यभिभूयते । दीपङ्करतः यावतसंख्येयकल्पं । असंख्येयकल्पस्तावद्गणनातीतत्वात्, दीपङ्करस्य परेण परतरेण चतुरशीतिबुद्धकोटिनियुतशतसहस्राण्यभूवन्, ये मयारागिताः इति प्रतिपत्त्यर्चया आराधिताः । न विरागिताः इत्यन्तरालेऽपि तदभिनिर्हारस्य अनुत्सृष्टत्वात् । यच्च इति कर्तृविशेषः ।

ततोऽयमर्थः यश्च आरागणादिकः (पुण्यस्कन्धः), यश्च उद्ग्रहणादिश्रद्धादिपुण्यस्कन्धस्तदुत्पादितश्च वासनात्मकः स्कन्धः, अनयोः (पुण्यस्कन्धयोः) पूर्वपुण्यस्कन्धः उत्तरपुण्यस्कन्धस्यास्य शततमीमपि कलां (१८२) नोपैति इति । एतावतोऽल्पीयस्त्वं दर्शयितुं सहस्रतमीमपि इत्याह । संख्या इति तुल्येष्वेव युज्यते, यथा हिमवता (तुल्य) विन्ध्य इत्युच्यते, न तु सर्षपः । कलां इत्यंशः, स च समानजातीय एव, यथा सुमेरोः कला पर्वतशिखरमेव, न तु तृणशिखरः । गणनां इत्यपि तुल्येष्वेव्, यथा सुमेरुरपि गिरिः, हिमवानपि गिरिः, न तु सर्षपः । उपमां इत्यपि सदृशेष्वेव, यथा गोसदृशो गवय इत्युच्युते, न तु मक्षिका । लघुरपि परिकर्मवशेन तस्य (महतः) कृत्यं करोति, यथा निशिते कृते सति दात्रमप्यसिकृत्यं करोतीति मत्वा उपनिषदं इत्याह । ताडनपीडनादिविस्तारोपायेन तीक्ष्णीकृतेऽप्यतिलघुतया न क्षमत इत्यर्थः । अत एव औपम्यमपि इत्याह । तस्योपमाभावमपि न क्षमते ।

सर्वज्ञवचनादेवैतज्ज्ञातव्यम्, एवंविधेषु इन्द्रियविषयातीतेषु विषयेषु सर्वज्ञवचनस्यैव प्रामाण्यात् । अपि च परिशुद्धे काले सर्वसत्त्वानामपि परिशुद्धत्वान्नाश्चर्याम्, अपरिशुद्धे तावत्काले ये सत्त्वा क्षणमात्रमश्यपरिशुद्धा भवन्ति, तदाश्चर्यं । एवं प्रभावमुखेन तावदप्रमेयत्वं प्रदर्शितं ।

कथमसंख्येयं संख्ययेति विचारणायां सचेत्पुनः सुभूते..... तस्मिन्समये इत्याद्याह । तेन बहुलं परिदीपितं । तत्पुण्यगणनयापि विषादमनुप्राप्य (१८३) व्यामुग्धचित्तान्तर्विशेषे उन्मादमनुप्राप्नुयुः । ततः उद्भूतेनोन्मादेन चित्तविक्षेपं वा गच्छेयुः । अनेन गाम्भीर्यमौदार्यं चोपदिष्टिं ।

एवमस्नाद्धर्मपर्यायात्संख्याप्रभावप्रतिसंयुक्तमेवंविधं फलं कथं ज्ञायत इति? अपि तु खलु पुनः सुभूते इत्याद्याह । फलं पुनः हेत्वनुरूपमेव भवति । लघिष्ठेऽपि न्यग्रोधवृक्षबीजेऽतिशयसारसम्पन्नत्वाद्बृहच्छाखापल्लववृक्षभूतं फलं नोपदृश्यते । धर्मपर्यायोऽप्ययं अल्पपरिवर्तोऽप्यत्यन्तगम्भीरः, अचित्यधर्मदेशनादचिन्त्यः । अतोऽस्मादचिन्त्याद्हेतुप्रत्यययानुरूपमचिन्त्यं फलं भवति, हेतुप्रत्ययप्रभावस्तावत्सर्वज्ञगोचरत्वादचिन्त्यः । विपाकशब्दोऽत्र फलार्थः, तेन निष्यन्दादिफलानि संगृह्यन्ते । एतेन सर्वेण चित्तप्रग्रहो दर्शितः ।

१५. अभिसमयकालेऽहमितिविकल्पवियोग-स्थानं ः

एवं निराकृतेऽपि ध्यानसास्वादे प्रत्यासन्नेऽभिसमयकालें यैः बोधिसत्त्वैः आत्मवैशिष्ट्यमवलोक्यऽअहं सम्यक्सम्बोधिमार्गप्रतिपन्नः, सर्वे मया सत्त्वाः परिनिर्वापयितव्याःऽ इति मन्यमानैस्तैस्तस्मिनात्मग्राहविकलेऽभिसमयाकाले कथं स्थातव्यम्, कथं प्रतिपत्तव्यम्, कथं चित्तं प्रग्रहीतव्यम्? इत्येतद्दर्शयितुं पञ्चदशस्थामधिकृत्याह- सूभूति..... अवोचत्- कथं भगवन्, बोधिसत्त्वयानसम्प्रस्थितेन स्थातव्यं इति । स्थातव्यमित्यादिदेशनात्रयं तु (१८४) प्रागेवोक्तं भगवता । नास्ति सुभूते, स कश्चिद्धर्मो यो बोधिसत्त्वयानसम्प्रस्थितो नाम इत्यवशिष्टेनात्र आत्मग्राहविसंयोगः क्रियते । शेषाणां (पदानां) व्याख्या तु पूर्ववत् ।

यथेदं पुद्गलधर्मनैरात्म्यं प्रागेव भगवता प्रकाशितं तथोक्ते सति बोधिसत्त्वेषु पुनः अभिसमयकाले कथमात्मग्राहः सम्भवेद्? तन्निराकरणायोक्तमपि किं पुनरुच्यते? अथैवमपि देशनायां संमुहयेत्प्रागुक्तस्यानवस्थानं च स्यादिति? तथा देशितेऽपि अनादिकालात्यन्तदृढीभूतात्माभिनिवेशवशतया केषाञ्चित्सम्मोहस्यानिवृत्तेः देशितोऽप्यर्थः पुनरुपदिश्यते । पुनर्देशनाकाले पारिषद्यानां सम्मोहनिवृत्तेनार्नवस्था स्यात् । भगवता कृतस्योपदेशस्य फलं तावत्सम्मोहविनिवृत्तिरेव विनेयजनानामिति न निष्फलं । अत एव सम्मोहनिर्वृतौ सत्यां फलाभावेन पुनः प्रवृत्त्यभावात्प्रकृतमेवेदं ।

१६. अववादपर्येषणस्थानं ः

यदि बोधिसत्त्वयानसम्प्रस्थितो नाम न स्यात्स कश्चिद्धर्मः (तर्हि) कथं भगवान्दीपङ्करस्य शास्तुरन्तिकादववादं प्राप्य अनुत्तरां सम्यक्सम्बोमभिसम्बुद्धः? अथ न स्याद्(सः) अभिसम्बुद्धः (तर्हि) अभिसमयकाङ्क्षिणाववादो न पर्येष्टव्य इति ये मन्यन्ते, तेषामववादवियोगविसंयोगाय षोडशस्यामधिकृत्य तत्किं मन्से सुभूते इत्याद्याह । पूर्वं धर्मकायाप्तिकामतावसरे धर्मग्राहनिषेध उक्तः, इदानीमभिसमयकाले अभिसम्बुद्धस्य तस्य निषेधः क्रियतेऽतो न पुनरुक्तता । नास्ति परमार्थतः स कश्चिदपि ज्ञानज्ञेयात्मको धर्मः, यथा पूर्वं विचारितं । तद्बलेन अविचाररमणीयमात्रतया श्रुतमय्यादिप्रज्ञोपादकमेण भगवतः- (१८५) स्वयम्भूसर्वज्ञज्ञानं तथ्यसंवृत्या ग्राह्यात्मकं समुद्भवति ।

ननु तदपि भगवतो दीपङ्करस्यानुभावमात्रमिति चेद्? एवं सत्यपि अनुरूपमेव, तथापि तस्मिन्सर्वबुद्धानां साधारणानुभावाः, न केवलं भगवतो दीपङ्करस्यैव । यदि न स्यादभिसम्बुद्धः (कश्चित्तर्हि) कथं तेन सम्यक्संबोधौ भगवान्व्याकृत इति विचार्य सचेत्पुनः सूभूते इत्याद्याह ।

अयमभिप्रायः- यदि भगवतः प्रत्यात्मवेद्यो धर्मः परमार्थतो तथाभूतो भवत्तदा स्यादभिसम्बुद्धः, अथवाऽमया पुनः धर्मोऽभिसम्बुद्धःऽ इत्यहङ्कारः समुद्भवेत्तदा स्याद्ऽअभिसम्बुद्धःऽ इत्येवं

विपरीताभिनिवेशात्तथागतस्य व्याकरणं न भवेत् । यतो हि तदाऽमयाभिसम्बुद्धःऽ इति न भवति, न च धर्मोदिष्वप्यभिनिवेशः भवति । तत एवाहं अविपरीतसम्यग्ज्ञानमार्गस्थितौ व्याकृतः ।

नास्ति स कश्चिद्धर्मोऽभिसम्बुद्धः इत्यनेन अर्थतो दीपङ्करस्यान्तिकादववादग्राहविकल्पं विपक्षत्वेन दर्शयित्वा तद्विकल्पप्रहाणाय छन्दः प्रणिधानं चापि देशितं । दीपङ्करेत्युपलक्षणमात्रेणाभिहितेन सर्वे धर्मोद्ग्रहणविकल्पा निर्वतन्ते । नास्ती इत्यनेन तस्य गम्भीरत्वमुक्तम्, सम्यक्सम्बोधये अववादपर्येषणविधानेन तावदस्योदारत्वं चोक्तम्, श्रावकप्रत्येकबुद्धाववादादत्यन्तविशिष्टत्वात् ।

(१८६)
यदि तथागतेन सम्यक्सम्बुद्धेन न स्यात्स कश्चिद्धर्मो योऽनुत्तरायां सम्यक्सम्बोधौ अभिसम्बुद्धः, तदा कथं तथागतत्वं भवेत्? तद्यथा पूर्वबुद्धा अभिसम्बोधिं गताः, तथैवात्रापि गतत्वादभिसम्बुद्धस्तथागत उच्यत इति चेत्? अभिसम्बुद्ध इत्याख्यस्य कस्यचिद्धर्मस्याभावात्तत्कथं भवेदिति विचिन्त्य तत्कस्य हेतोः इति पृष्ठवान् । तथागत इति सुभूते इत्यादि चोदतरत् । तथता इति धर्माणामविपरीतस्वभाव उच्यते, स चन्दिशान्तादिस्वभावः, सर्वधर्मसाधारणत्वात्सा भूतः इति वचनेन विशेषिता, भुतस्तु यथार्थत्वेन तथागतज्ञानमभिधीयते । तस्यास्तथताया या परमार्थतोऽनुपन्नधर्मता स तथागत इत्युच्यते । यथोक्तम्-

अनुत्पादधर्मः सततं तथागतः । इति ।

परमार्थतो धर्मतापि धर्मिणो नेतरा, अतः परमार्थतः सर्वधर्माणामनुत्पादो धर्मता । सर्वधर्माधिगमस्वभावोऽविचाररमणीयः परमार्थतोऽनुत्पन्नः तथ्यसंवृतौ परिकल्प्यमानः सज्ज्ञानविशिष्टःऽतथागतःऽ उच्यत इति वाक्यार्थः । तस्य च परमार्थतोऽनुत्पन्नत्वान्नास्ति कश्चिद्ग्राह्यो ग्राहको वा । तस्मान्नास्ति कश्चिद्धर्मोऽप्यभिसम्बुद्धः (नाम) परमार्थतः । तथ्यसंवृतिमाश्रीत्य तेन विशिष्टज्ञानेन यथा अभिसम्बुद्धः तथा गत इत्येवमभिप्रायः ।

(१८७)
परमार्थाश्रयेणाभिसम्बुद्ध इति कस्मात्तथा नोच्यते? इति चिन्तायां यः कश्चित्सुभूते इत्याद्याह । तत्कस्य हेतोः? इति न सत्यं इत्यनेन योग्जं । शेषस्तु सुगमान्न व्याख्यायते । एवं तर्हिऽसंवृतितः तथागतेन अभिसम्बुद्धःऽ इति व्यवस्थैव कथं व्यवस्थाप्यत इति विचार्य यश्च धर्मः इत्युक्तं । यः इति रूपादिलक्षणधर्मः, तत्र न सत्यं इतिः मायावत्प्रतिभासमानानां विचार्यमाणानामत्यन्तशून्यत्वेनानुत्पन्नत्वात्शशश्रृङ्गवदत्यन्ताभावः । न मृषा अविचाररमणीयस्वभावेन मायावत्प्रतिभासमानात् । अथवा नापि सत्यम्, न कस्यापि धर्मस्य परमार्थतः सिद्धेः । न मृषा, न च विचारगोचरः कश्चित्सत्यः सिद्धः, सर्वधर्माणामनुत्पादात् ।

अनेनाध्यारोपापवादान्तौ निराकृत्य मध्यममार्गं च व्यवस्थाप्य योगसमापत्तौ प्रवर्त्यते । तस्मातित्येवं परमार्थतः सर्वधर्माणामनुत्पादात्न सत्यं न च मृषा । तथागतोऽपि परिशुद्ध्यानुत्पादधर्मया प्रभावितः, अनुत्पादधर्मतायाः साधारणत्वात्, (तथा हि)-

अनुत्पादधर्मः सततं तथागतः
(१८८)
सर्वे च धर्माः सुगतेन सादृशाः ।
निमित्तग्राहेण तु बालबुद्धयः
असत्सु धर्मेषु चरन्ति लोके ।।

इत्यादि । सर्वधर्मा बुद्धधर्माः इति तथागतो भाषते । यद्यनुत्पन्ना एवामी धर्मास्तत्कथं सर्वधर्माः इत्युच्यन्त इति प्रविचिन्त्य सर्वधर्मा इति सुभूते इत्याद्याह । अयमत्रार्थः- परमार्थतस्तथा विद्यन्ते, न तु व्यवहारप्रज्ञप्तितः । असन्तस्तावत्परमार्थतो रूपादिधर्माः, किन्त्वपरमार्थं खल्वविचारितमाश्रित्य यस्मात्स्वसामान्यलक्षणग्रहणं तस्मात्सर्वधर्माः इत्युच्यन्ते, न तु परमार्थतः, तत्र स्थितानां सर्वेषां दृश्यमानत्वेऽप्यभावात् । अनेन तावद्विक्षेपनिग्रहः सन्दर्शितः ।

१७. अभिसमय-स्थानं ः

यदि न स्यात्स कश्चिद्धर्मो भगवताभिसम्बुद्धः कथं (तर्हि) बोधिसत्त्वा उपादत्तमववादं सम्मुखीकृत्य धर्मपुद्गलनैरात्म्यमधिगच्छेयुः? इति विचिन्त्याभिसमयप्रतिपादनार्थः तद्यथापि नाम इत्याद्याह । अयमभिसमयस्तावत्ज्ञानप्राप्तिनिरभिमानिताभ्यां संदर्श्यते । कथं ज्ञानप्राप्त्येति चेत्? द्विविधं ज्ञानमाश्रित्य, गोत्रसम्परिग्रहज्ञानं समताज्ञानञ्च । तत्र यज्ज्ञानप्राप्त्या तथागतगोत्रे समुत्पद्य बुद्धगोत्रे नियतो जायते तद्गोत्रसम्परिग्रहज्ञानं । तदुत्पादेन उपेतकायो भवति । उपेत इत्यात्मना परिगृहीतः, कायस्तु तथागतकायः । येन सोऽधिगतः, स उपेतकायः । कथं ज्ञायते तज्ज्ञानप्राप्तिरित्याह- महाकायः इति ।

अनेन पुद्गलधर्मनैरात्म्यसमताज्ञानं समवाप्य अभिसमयः सम्प्रदर्श्यत इत्यतो गोत्रज्ञानमभिधीयते । तेन समताज्ञानेन पुद्गलधर्मनैरात्म्यधिगम्य सर्वे (१८९) सत्त्वा आत्मनि (आत्मवत्) सङ्गृहीता भवन्ति । तस्मात्समस्तसत्त्वकायानामात्मनि सङ्ग्रहेण स महाकाय इति । नाप्यपार्थकोऽयं शब्दः, एवं सर्वसत्त्वानामात्म- सङ्ग्रहेण स काय इत्युच्यते । तेषां संबहुल्वेऽपि न महाकायशब्दार्थत्वं । अनेन स्थानस्यास्य औदार्यं समुदीरितं ।

अयमभिप्रायः- बोधिसत्त्वानामभिसमयोऽप्ययं तथ्यसंवृतिमाश्रित्य विशिष्टज्ञानोत्पादमात्रेण प्रभावितो भवति । परमार्थतो न किञ्चिन्निरूपकं निरूप्यं वेति दर्शयितुम्, आर्यसुभूतिः- भगवंस्तथागतेन पुरुषो भवेदुपेतकायः इत्याद्याह । अनेनार्थतस्तावदुपेतकाय-महाकायाभिनिवेशस्तु विपक्षत्वेन निर्दिष्टः । (अतः) तत्प्रहाणाय छन्दप्रणिधानाभ्यां स्थातव्यमिति दर्शितं । उपेतकायो महाकाय इति निमित्तमात्राभिधानेन बोधिअसत्त्वानां सर्वधर्मेष्वभिनिवेशो निवर्तते । परमार्थेऽपि तावद्व्यवस्थाप्य योगसमापत्तौ चावतार्यते । गम्भीर्यमप्युक्तम्, समारोपान्तोऽपि निराकृतः । पूर्वेण तावदपवादान्तः प्रतिषिद्धः ।

यदि तथागतेन स एव कायो स्यात्नोक्तः स्यात्तदा प्राप्ताभिसमयो बोधिसत्त्वंऽएवं मया बोधिसत्त्वाभिसमयः सम्प्राप्तः साम्प्रतमहं सत्त्वान्परिनिर्वापयिष्यामिऽ इत्येतत्कथं सञ्चितयेत्यन्यदीयं सद्विकल्पं समुदीक्ष्य निरभिमानितयाभिसमयं दर्शयितुं यो बोधिसत्त्वं इत्याद्याह । अनेन य एवं वदेत्- अहं सत्त्वान्परिनिर्वापयिष्यामीतिऽअहं य एवं वदेत्- अहं सत्त्वान्परिनिर्वापयिष्यामीतिऽ अहं बोधिअसत्त्वोऽस्मि (१९०) इत्यभिमानी स तथ्यतो न बोधिसत्त्वः इति दर्श्यते । तत्कस्य हेतोः? इत्यत्र ज्ञापकहेतुः परिपृष्टः । धर्मः इति तु रुपादिअस्वभावो वा पुद्गलादिस्वभावो व । युक्तितो विचारणायां तस्य धर्मस्यादृस्टत्वादार्यसुभूतिरप्याह नो हीदं इति । तस्या युक्तेः सर्वत्र साधारणत्वाद्भगवान्नैरात्म्यद्वयावतारणार्थं तस्मादित्याह । निसत्त्वाः इत्यादि तावदुपलक्षणम्, निःस्वभावा अपि द्रष्टव्याः । अनेन विक्षेपनिग्रहो निर्दिष्टः । उक्तोऽभिसमयः ।

अत ऊर्ध्वं बुद्धभूमे पर्येषणं । तदपि बुद्धस्य सप्तभिः सम्पद्भिः संगृह्यते । सप्त सम्पदश्च-
१. क्षेत्रपरिशुद्धिसम्पद्
२. अनुत्तरदृष्टिपरिशुद्धिसम्पद्
३. अनुत्तरज्ञानपरिशुद्धिसम्पद्
४. प्राप्तपुण्यस्कन्धाधिपत्यसम्पद्
५. कायसम्पद्
६. वाक्-सम्पद्
७. चित्तसम्पच्च ।

१. क्षेत्र परिशिद्धिसम्पदः

तत्र यदि न स्यात्कश्चिद्बोधिसत्त्वो नाम धर्मः, (तर्हि) कस्तावद्बुद्धक्षेत्रं परिनिष्पादयितुं यत्नं कुर्यात्? इत्याशङ्कां निराकर्तुं बुद्धक्षेत्रपरिशुद्धिसम्पदमधिकृत्य- यः सुभूते बोधिसत्त्वः इत्याद्याह । सोऽपि तथैव वक्तव्यः इत्यभिमानित्वान्नोच्यते स बोधिसत्त्व इत्यर्थः । (१९१) पुद्गलधर्मनैरात्म्ययोरनधिगमेऽप्यधिगतमित्यभिमानात् । एवमहस्मीत्यभिमानान्न तस्य पुद्गलनैराअत्म्यावगमः, न च धर्मनैरात्म्यावबोधः, असत्सु क्षेत्रव्युहेष्वपि तत्राभिमानात् । अनेन क्षेत्रव्यूहेषु मायोपमत्वाधिमुक्त्या बोधिसत्त्वेन कथं स्थातव्यमित्येतद्दर्शितं ।

यदि परमार्थतो न स्युस्ते क्षेत्रव्यूहाः (तदा) भगवता कथमुक्ता इति विचिन्त्य तत्कस्य हेतोः? इत्याह । पूर्ववदस्य व्याख्यानं । न चेयं पुनरुक्तिः । पूर्वं तावदधिमुक्तिचर्याभूमिस्थितानां बोधिसत्त्वानां बोधिसत्त्वक्षेत्रपरिशुद्धौ प्रणिधानावस्थायां बोधिसत्त्वविकल्पस्य निषेधार्थं (उक्ताः), सम्प्रति बुद्धेक्षेत्रपरिशुद्धिपरिनिष्पत्तये ये बोधिसत्त्वा एवंविधेनाभिनिवेशेन प्रवर्तन्ते, येषां चैवंविधो विकल्पः, तन्निराकरणार्थमुक्तं । न चानवस्थाप्रसङ्ग, तदैवंविधस्य कस्यचिदितरविकल्पस्यासम्भवात् ।

अनेनेह बोधिसत्त्वेन कथं प्रतिपत्तव्यं तद्व्यपदिष्टं । कीदृशो बोधिसत्त्वो नामेत्यत्र यः सुभूते बोधिसत्त्वः इत्याद्याह । निरात्मानो धर्माः इति द्विरुक्तया द्विविधेन नैरात्म्येन सर्वधर्माणां नैरात्म्यं दर्श्यते । बोधिसत्त्वो बोधिसत्त्वः इति द्विरुक्त्या तदेव द्विविधं नैरात्म्यज्ञानं दर्श्यते । अथवा एकस्तावद्बोधिसत्त्वः आवृतः, बोधिसत्त्व इत्याख्यात इत्युत्तरस्तु (कथनस्य) प्रकारः ।

तेन किं दर्शयिष्यत इति चेद्? केन निष्पाद्यन्ते यदि पुद्गलादिग्राहकाभावः, क्षेत्रव्यूहाः इति धर्मग्राहकस्याप्यभावः, उभयभावाधिगमेन बोधिसत्त्व इत्याख्यात इति निर्दिष्टं । अनेन चित्तप्रग्रहो देशितः । एभिः सर्वैः स्थानै गाम्भीर्यं दर्शितं । तत्र मायावद्बुद्धक्षेत्रपरिनिष्पादनाधिमुक्तया बोधिसत्त्वानां प्रवृत्तिप्रदर्शनेनौदार्यमुक्तं ।

(१९२)

२. अनुत्तरदृष्टिपरिशुद्धिसम्पदः

यदि नास्ति बोधिसत्त्वो नामः कश्चिद्धर्मः, तदा तथागतः परिशुद्धदर्शनेन परिशुद्धज्ञानेन च युक्त एव न भवेत्, तस्य बोधिसत्त्वादुत्पन्नात्वात्, तस्याभावे स कथं भवतुमर्हति, अहेतुकत्वे नित्यसत्त्वादिदोषाः, तस्माद्यस्यां संनिपतिततायां परिषधेवं विकल्पो भवेत्, तस्याः कृते परिशुद्धं दर्शनं ज्ञानञ्चेत्यनुत्तरद्वयमधिकृत्य तत्किं मन्यसे सुभूते इत्याद्याह । पूर्वतः भगवतोऽभिप्रायं गृहीत्वा आर्यसुभूतिरप्याहसंविद्यते इति ।

अनेन परमार्थतः बोधिसत्त्वो नाम स कश्चिद्धर्मो न भवति, तथापि संवृतौ पुण्यज्ञानसम्भारं परिपूर्य परिशुद्धंज्ञानदर्शनाभ्यां यस्तथागतो भवति, (तेन) अविचारमणीयस्कन्धमात्रस्य बोधिसत्त्वस्यास्तित्वं भवन्त्येव । अन्यथा संवृतावपि यदि स न भवेत्तदा कस्तथागतो भवेदित्येवं तावत्दर्शितं । तत्र संविद्यते तथागतस्य प्रज्ञाचक्षुः इत्येव तावन्नोच्यते, (अपि तु) विशिष्टं विशुद्धदर्शनमभिधातुं चक्षुषो विद्यामानत्वं दर्शितं ।

(१९३)

समासतश्चतुर्विधं भवति चक्षुः- रूपग्राहकम्, परमार्थसत्यग्राहकम्, संवृतिसत्यग्राहकम्, सर्वाकारज्ञेयग्राहकं च । रूपग्राहकमपि द्विविधम्- कर्मफलं भावनाफलञ्चेति । पञ्चविधं चक्षुः क्रमशः- तत्र स्थूलविषयत्वात्प्रथमं रूपग्राहकं कथितम्, परमार्थवशेन संवृतिज्ञानं परिशुद्धध्यतीत्यतः पूर्वं परमार्थसत्यग्राहकं पश्चाच्च संवृतिसत्यग्राहकमभिहितमिति सङ्गच्छते क्रमनिर्देशः । पुद्गलधर्मनैरात्म्ययोः संविद्यते प्रज्ञाचक्षुः, संवृतौ धर्ममात्रमेव तावदवभासते, न तु पुद्गल इति पुद्गलशून्ये धर्ममात्रे धर्मचक्षुः, सर्वज्ञेयानां सर्वाकारज्ञानं तावद्बुद्धचक्षुरित्युच्यते, अनेनेदानीं साक्षात्कृत्य विहरणात् । तथ्यसंवृतौ पञ्चचक्षुषां देशनयोक्तं विशुद्धदर्शनं ।

३. अनुत्तरज्ञानपरिशुद्धिसम्पदः

विशुद्धज्ञानाभिधानार्थम्- तत्किं मन्यसे सुभूते इत्याद्याह । त्रैकालिकाः चित्तचैतसास्तावच्चित्तसन्ततिः । ततः त्रैकाल्यविषयत्वेन तद्विषयावबोधो ज्ञानमित्युच्यते, न तु दर्शनं । तदपि सरागचित्तवीतरागचित्तेत्यादिनानाविधसंक्लेशव्यवदानभावेन वेदितव्यं ।

तावन्तो लोकधातवः इत्युपलक्षणम्, अनन्तलोकधात्वन्तर्निहितसत्त्वानां चित्तधारायाः परिज्ञानात् । तथाहि- संवृतौ तथागतस्य मांसचक्षुरादीनि भवन्ति, अतस्तन्निष्पादनार्थं बोधिसत्त्वेन छन्दप्रणिधानाभ्यां स्थातव्यं । अनेन तावद्वचनेन सम्पद्द्वयं परिदीपितं ।

(१९४)

मांसचक्षुरादीन्यपि एकानेकस्वभावाभ्यां विचारणायामनुपलब्धान्येव । न ह्यर्थान्तरज्ञानेन ग्रहणं युज्यते, यथा पूर्वं विचारितम्, एवं सति कथं प्रज्ञास्येते तथागतस्य मांसचक्षुरादिविद्यमानता चित्तधारा चेति चित्ताशयं विदित्वा तत्कस्य हेतोः? इत्याह । बोधिसत्त्वेन कथमनयोर्द्वयोर्विशुद्धयोर्योगसमापत्त्या प्रतिपत्तव्यम्? इत्येतदभिधातुं चित्तधारा चित्तधारा इत्याद्याह । परमार्थतः अधारा इति । स्वभावतोऽसत्त्वेऽपि संवृतिमधिकृत्याह- तेनोच्यते चित्तधारेति इति । अन्यथा परमार्थतः सर्ववाग्गोचरातीतत्वान्न वक्तुं शक्यत इत्यभिप्रायः । चित्तधारेत्युपलक्षणं । मांसचक्षुरादीन्यपि चक्षुःस्वभावरहितान्येव उक्तानीति कथनं प्रकृतं साक्षान्नोक्तं ।

अत्र कथं चित्तं प्रग्रहीतव्यमिति तदभिधातुमाह तत्कस्य हेतोः? इति । अधारेत्यनेन सह योजनीयं । अतीतादीनां चित्तानां परमार्थतोऽनुत्पन्नत्वादनुपलम्भः । सत्त्वेऽपि ग्रहणानुपपत्त्या नानुपलम्भः । तथा सति अचित्तधारादेशनमपि न भवेत्, न चानुपलम्भमात्रेण भावानां निःस्वभावत्वं स्यात् । यथा त्रैकालिकचित्तस्य परमार्थतोऽभावस्तथा पूर्वमुक्तं वक्ष्यते च । चित्तोक्तिरूपलक्षणम्, ततोऽतीतादिमांसचक्षुरादीन्यप्यनुपलब्धान्येव । अत्र अधारा इत्यादिभिः पदैर्गाम्भीर्यमुक्तम्, शेषैरौदार्यं ।

(१९५)

४. प्राप्तपुण्यस्कन्धाधिपत्यसम्पदः

यदि नास्ति त्रैकालिकं चित्तं तदा पुण्यस्कन्धोऽपि न स्यात्, चिताश्रितत्वात्तस्य । ततः तथागतस्य पुण्यस्कन्धाधिपत्यसम्पदं सम्पादयितुं कथं बोधिसत्त्वो यत्नं कूर्यादिति विचिन्त्य पुण्यस्कन्धाधिपत्यसम्पदमधिकृत्य- तत्किं मन्यसे सुभूते इत्याद्याह । अनेन कुलपुत्रो वा कुलदुहिता वा योऽन्तशो रत्नादिकं बाह्यवस्तु त्यजति, सोऽपि (यदि) महापुण्यस्कन्धेन युक्तो भवति (तदा) कथं न तथागतस्य असंख्येयाप्रमेयकल्पेषु दुष्करानेकशतान्यभ्यस्यतः पुण्यस्कन्धाधिपत्यं स्यादित्येवं देशितं ।

अत एव परमार्थतोऽसत्यपि पुण्यस्कन्धे संवृतौ सत्त्वाद्बोधिसत्त्वेन तत्र वशीभावं निष्पादयितुं छन्दप्रणिधानाभ्यां स्थातव्यमित्यादर्शितं । अनेनौदार्यमप्युक्तं । कथं न परमार्थतः पुण्यस्कन्धसत्त्वं व्यवस्थाप्यत इति विचिन्त्यऽबोधिसत्त्वेनात्र कथं प्रतिपत्तव्यम्, कथञ्च चित्तं प्रग्रहीतव्यम्,ऽ इत्युभयं सन्दर्शियितुं सचेत्सुभूते इत्याद्याह । सचेतितिऽयदिऽ इत्यर्थः । न तथागतोऽभाषिष्यतिति

परमार्थतोऽभिधानं नाचरिष्यत् । अनिर्देशेऽपि तथा ख्यायत इत्यभिप्रायः । यथा परमार्थतः पुण्यस्कन्धस्याभावस्तथा प्राग्वर्णितः । अनेन तथागतस्य पुण्यस्कन्धाधिपत्यसम्पदं परिनिष्पादयितुं प्रस्थितेन बोधिसत्त्वेन परमार्थतस्तदनुपलम्भेन योगसमापत्त्या प्रतिपत्तव्यं । परमार्थतस्तदालम्बनाभिनिवेशपरिहारेण (१९६) चित्तं प्रग्रहीततव्यं इत्युभयं देशितम्, गाम्भीर्यमप्युक्तं ।

५. कायसम्पदः (अ) रूपकायसम्पद्

यदि पुण्यस्कन्धो नैव स्यात्तदा तथागतानां द्विविधा कायलक्षणसम्पद्-अनुव्यञ्जनकायसम्पद्, लक्षणकायसम्पच्च यानुत्तरपुण्येनाभिनिर्वर्तयितुमिष्यते, सा नैव स्यात्, कारणाभावात् । तस्मात्तथागतस्य द्विविधां कायसम्पदं परिनिष्पादयितुं कथं बोधिसत्त्वैर्यत्नोऽनुष्ठेय इति विचिन्तयद्भ्यस्तथागतस्य रूपकायसम्पदमधिकृत्य- तत्किं मन्यसे सुभूते इत्याद्याह ।

रूपकायः इत्यनुव्यञ्जनकायरूपेण द्रष्टव्यः । लक्षणकायः पश्चाद्वक्ष्यते गोबलिवर्दन्यायेन । ततोऽयमत्रार्यसुभूतेराशयः- यथा परमार्थतोऽस्कन्ध एव पुण्यस्कन्धस्तथा रूपकायोऽप्युनुत्पन्न एव । अतः परमार्थतः न रूपकायपरिनिष्पत्त्या तथागतो द्रष्टव्यः इत्युच्यते । संवृतौ मायानिर्मितबुद्धवद्विद्यत एव रूपकायः, तत उपपन्न एव (तस्य) पुण्यस्कन्धादुद्भवः ।

तस्माद्बोधिसत्त्वेन मायानिर्मितबुद्धस्य तथाविधरूपाधिमुक्तया तत्प्रतिपत्तये छन्द-प्रणिधानाभ्यां स्थातव्यमिति देशितं । नाप्यत्र पुनरुक्तिता । पूर्वमधिमुक्तिचर्याभूमौ रूपकायाप्तिकामताकाले तथागतपूजासत्कारकाले च तथाविधोऽभिनिवेशः परिवर्जितः, सम्प्रति शुद्धाध्याशयभूमौ तथागतरूपकायसम्पदं (१९७) परिनिष्पादयितुं सम्प्रस्थितस्य बोधिसत्त्वस्य रूपेऽभिनिवेशो भवतीति यासां प्रसिद्धिस्तासां परिषदां दुर्विकल्पो निराकृत इत्युक्तत्वात् ।

एवं तर्हि तथागतानां रूपकायः कस्माद्देशित इति विचिन्त्य तत्कस्य हेतोः? इत्यपृच्छत् । न रूपकायपरिनिष्पत्त्या तथागतो द्रष्टव्यः इत्यनेन योजनीयं । नासौ तावत्सिध्यति, अवपविरूपेण परमाणुसञ्चयरूपेण वा रूपस्यासिद्धत्वाद्, यथा विचारितं प्राक् । अनेन बोधिसत्त्वेन कथं प्रतिपत्तव्यम्, तन्निर्दिष्टं । तेन इति इत्यं संवृतौ भावः, न तु शशविषाणवत्सर्वथाभावः । अनेन चापवादान्तं परिहृत्य कथं चित्तं प्रग्रहीतव्यम्, (इति) एतन्निर्दिष्टं । अनेन सर्वस्थानेन गाम्भीर्यं प्रदर्शितं । संवृतौ तथागतस्य रूपकायसम्पदं निष्पादयितुं बोधिसत्त्वैः करणीयानां यत्नानां निदर्शनेन आदार्यमपि दीपितं ।

(ब) लक्षणकायसम्पदः

लक्षणकायसम्पदमधिकृत्य तत्किं मन्यसे सुभूते इत्यद्याह । अत्र पूर्ववत्सर्वमभिहिअतं ।

६. वाकसम्पदः

यदि रूपकायपरिनिष्पत्त्याअ न तथागतो द्रष्टव्य इति चेत्, तदा देशनापि भगवता नैव भवेत्, रूपकायेन संगृहीत्वात्तस्याः? अतो (१९८) बोधिसत्तवैस्तथागतस्य वाक्सम्पदं निष्पादयितुं कथं यत्नः कर्त्तव्य इति विचिन्तयद्भ्यो वाक्सम्पदमधिकृत्य तत्किं मन्यसे सुभूते इत्याद्याह । परमार्थतो वाच्य-वाचक-वचनानामभावात्न तथागतस्यैवं भवति मया धर्मो देशित इति । अन्यथा विपर्ययान्न भवेत्सर्वज्ञः । यथा वाचकाः आत्मादयः, वाच्या बाह्याध्यात्मिका भावाः, वचनानि करणरूपाणि शब्दस्वभावाभावात्मकानि वा तथा विस्तरेण प्रागेवोक्तानि । सर्वे भावाः शून्यत्वव्याप्ताः प्रागेव प्रतिपादिताः । संवृतौ वाच्य-वाचक-वचनानां अविचाररमणीयत्वेन व्यवहारमात्र एव (ते) भवन्ति, न तु परमार्थे ।

यदि वस्तुतत्त्वस्यैवमभिधानेऽपि व्यामोहेन किंचित्परमार्थतस्त्रयाणां (तेषां) परामार्थसत्त्वं कल्पयेयस्तदाऽकिं नु स्यात्ऽ इति विचिन्त्य यः सुभूते इत्याद्याह । अभ्याचक्षीत इत्यभ्यालपेत् । कथं तदभूतमालपितुं शक्यत इति विचारणायामाह असतोद्गृहीतेन इति । विपरीताभिनिवेशतो वितथग्रहणात्तदभूतमित्यर्थः । अनेन तथागतस्य वाक्सम्पदि प्रवृत्तेन बोधिसत्त्वेन प्रतिश्रुत्कादिवज्ज्ञात्वा प्रवर्तितव्यमिति, बोधिसत्त्वेन कथं स्थातव्यमिति देशितं ।

यदि वचनादित्रयमसत्(तदा) पुद्गलधर्मनैरात्म्यदेशकेन भगवता नानापदवाक्यात्मिकेयं धर्मदेशना कथं प्रसिध्यति? तस्यां सत्यां तदभिधेयो वाच्योऽपि स्यादेव, यश्च तद्देशको वाचकः, सोऽपि भवेदेव । तद्बलेन त्रीण्यपि (वाच्य-वाचक-वचनानि) भवेयुरिति चिन्तायां तत्कस्य हेतोः? इति पृष्टं । अत्र धर्मदेशना इत्युदतरत् ।

अयमभिप्रायः- परमार्थतः धर्मदेशनायां सत्यां (सा) स्वलक्षणस्वभावा वा स्यात्सामान्यलक्षनस्वभावा वा । तत्र न तावत्प्रथमः पक्षः, सर्वं पारमार्थिकं स्वलक्षणं तावत्पूर्वमेव विस्तरेण निराकृतं । न च द्बितीयोऽपि (१९९) असति स्वलक्षणे आधारस्याभावेन कस्यचिदप्यसत्त्वात् । सामान्यद्रव्यत्वाभ्युपगमे स्वलक्षण एव सङ्गृहीतं स्यादिति तन्निषेधेन तस्यापि निषेध एव । अन्यव्यावृत्त्या सामान्यलक्षणमध्यारोपितस्वभावमिति परिकल्पिते सति धर्मदेशनाया नैरर्थक्यत्वेन सिद्धसाधनं ।

तस्याः (शब्दात्मिकाया देशनायाः) परमार्थतः स्वलक्षणसत्त्वेऽपि न युज्यते तया धर्मदेशना । स्फोटादिशब्दस्य नित्यस्वभावस्य परैः पदत्वेन परिकल्पितस्य क्रमाक्रमाभ्यामर्थक्रियाकारित्वं तावद्विरुध्यते, सर्वसाअमर्थ्यापगतत्वाच्चैतन्यादिषु कुत्रापि खलु नैव युज्यते, अकिञ्चित्करत्वेन कथं तद्भवेत्पदम्? अनित्यस्यापि तावत्स्वलक्षणस्व न युज्यते पदत्वम्, सङ्केतकाले दृष्टस्य व्यवहारकालेऽनन्वयात् । न हि युज्यते अन्यस्य सङ्केतोऽन्यस्य च व्यवहारः, अतिप्रसङ्गात् । अत एव स्वलक्षणमप्यभिधातुं न युज्यते, अनन्वयात् । सामान्यपदार्थेऽभिधेयत्वेनाभ्युपगते सति अभिधेयस्वभावत्वेन तस्य स्वलक्षणस्वरूपत्वान्न हि प्रदेशान्तरगमनं ।

एकत्वं तु देशकालादिभिन्नास्वनेकव्यक्तिष्वनुगतमपि न युज्यते तथा हि- (अथ) एकस्यां व्यक्तौ सर्वात्मना व्याप्तं स्यात्तदा येन एकत्वेन परिकल्पितः स स्वभावस्तेन अन्यत्राधिगतेतरव्यक्तिभिः सम्बद्धः तदितरस्वभावस्तत्र न भवेदिति, एकत्वहानिप्रसङ्गात् । (अथ) एकदेशेन व्याप्तं स्यात्तदा

सावयत्वाग्रहणदोषः । एवं यावत्यो भिन्नव्यक्तयस्तासामेकदेशेन व्याप्तिव्यवस्थया तावतीनां ग्रहणं स्यात्तदा एकव्यक्तिग्रहणं तावदेकदेशग्रहणेन युक्तं भवेत्, भिन्नव्यक्तिषु देशकालपरिमाणादिभिन्नासु तास्वेकव्यक्तिग्रहणं तावदेकदेशग्रहणाद्युगपुद्ग्रहणाभाव एव । तस्माद्वाच्य-वाचकत्वं तावदश्यारोपेणैव युज्यते, न तत्त्वतः । अत एवोक्तं भगवतान्यत्र-

येन येन हि नाम्ना वै यो यो धर्मोऽभिलप्यते ।
(२००)
न स संविद्यते तत्र धर्माणां सा हि धर्मता ।।

वचनं मिथ्या, वाच्य-वाच्यकानां या देशना तद्द्वारा आगता, सापि स्पष्टैव । उभयोरभावो भगवता पृथकत्वेन नोक्तः । अनेन बोधिसत्त्वेन कथं प्रतिपत्तव्यम्, कथञ्च चित्तं प्रग्रहीतव्यमित्येतद्दर्शितं । एतेन सर्वेण गाम्भीर्यं दर्शितं ।

७. सप्तधा चित्तसम्पदः-
१. स्मृत्युपस्थानम्
२. अभिसम्बोधिः
३. महाधर्मार्थप्रज्ञप्तिः
४. महाववादार्थप्रज्ञप्तिः
५. धर्मकायपरिग्रहणम्
६. संसारे निर्वाणे चाप्रतिष्ठानम्
७. प्रस्थिति-पारिशुद्धिः ।

१. स्मृत्युपस्थानं ः

तत्रेदानीमेवं गम्भीरधर्मोऽयमनागते काले घनीभूते कुदृष्टिजाले कथं सफलो भविष्यतीति नाभिश्रद्धधन्ति परिवाराः । य एवं चिन्तयन्ति तेषामविश्रम्भं निवारयितुं आर्यसुभूतिश्चित्तसम्पत्सु स्मृत्युपस्थानमधिकृत्य भगवनित्याद्याह । भगवताप्यनागतेऽध्वनि शीलवन्तो गुणवन्तश्च भविष्यन्तीति किं नोक्तपूर्वं । सम्प्रति तेषां सत्त्वेऽसत्त्वे वा एकान्तेनानभिनिवेशं देशयितुं अस्ति इति नोक्तम्, अन्तद्वयनिषेधार्थं ते सुभूते इत्याद्याह ।

(२०१)
परमार्थतः स्कन्धपुद्गलादीनां सत्स्वभावानुपलम्भात्न सत्त्वाः इत्यनेनाध्यारोपान्तनिषेधः, अविचारैकरमणीयत्वेन सदैव विद्यमानत्वेन नासत्त्वाः इत्यनेनापवादान्तनिषेधः । भविष्यन्ति इत्यनया देशनया भगवतः कीदृगविपरीतस्मृत्युपस्थानमिति सत्त्वेभ्यो दर्शयित्वा भगवतस्तस्यां स्मृत्युपस्थानसम्पदि बोधिसत्त्वेन छन्द-प्रणिधानाभ्यां स्थातव्यमिति निर्दिष्टं । न ते सत्त्वाः नासत्त्वाः? इत्यनेन योगसमापत्तिनिर्दिष्टा ।

यदि न ते सत्त्वाः स्युस्तदा कथं भगवताऽभविष्यन्त्यनागतेऽध्वनि शीलवन्तो गुणवन्तश्च तेऽ इत्याद्युक्तमित्येवं परिवितर्कं विचार्यं तत्कस्य हेतोः? इत्यपृच्छत् । असत्त्वास्ते भाषिताः इति परमार्थतोऽसत्त्वा एव, संवृतिसत्स्कन्धसद्भावमाश्रित्य भाषितास्ते । संवृतौ सत्त्वात्तेनोच्यन्ते सत्त्वा इति । अन्यथा संवृतावप्यसत्त्वे न (ते) भाषिताः स्युरित्यनेन चित्तप्रग्रहो दर्शितः । सर्वेण तावदनेन गाम्भीर्यमुक्तं । सर्वसत्त्वेभ्यो भगवताप्रतिहतस्मृत्युपस्थानदेशनात्तावदौदार्यं निर्दिष्टं ।

२. अभिसम्बोधिः

यदि न स्याद्भगवतः काचिदपि धर्मदेशना, तदा न स्यात्(सः) सम्यक्सम्बुद्धोऽपि ततस्तथागताभिसम्बोधिसिद्धये व्यर्थः स्याद्बोधिसत्त्वानां यत्नः । यतोऽभिसम्बुद्धधर्मा इष्यन्ते, अतो देशनापि भवतीति मन्वानेभ्यः (२०२) तेभ्योऽभिसम्बोधिं अधिकृत्य तत्किं मन्यसे सुभूते इत्याद्याह । आर्यसुभूतिः पूर्वाभिप्रायं गृहीत्वा नास्ति सः इत्युदतरत् । तदेवं मन्यते- परमार्थाभिप्रायेण भगवता धर्मदेशना प्रतिषिद्धेति । यथा परमार्थतः कस्याश्चिदपि धर्मदेशनाया अभावः (तथा) अभिसम्बुद्धस्याप्यभावः, एतत्पूर्वं निर्दिष्टं ।

संवृतितः भगवतो धर्मदेशना, सम्बोधिः, तद्धेतुप्रतिपत्तिश्चापि विद्यन्त एव, तस्माद्बोधिसत्त्वेनानुत्तरसम्यक्सम्बोधेस्तथ्यसंवृतिस्वभावायाः साधनार्थं यत्नः करणीयः । अनेन बोधिसत्त्वेन कथं स्थातव्यमिति दर्शितं । पूर्वमववादपर्येषणकाले बोधिसत्त्वानाऽअभिसम्बोधि परमार्थःऽ इति यो विकल्पः, स अपनोदितः, इदानीं बुद्धभूमिपर्येषणकाले परेषां तादृग्विकल्पनिराकरणान्न भवति पुनरुक्तिदोषः ।

भगवता अनुत्तरा सम्यक्सम्बोधिस्तथ्यसंवृतौ व्यवस्थापिता, सा कीदृशीति अत्र अणुरपि इत्याद्याह । यत्र ज्ञानं प्रचरति (तत्र) भगवता ग्राह्यस्वरूपस्य स्वलक्षणस्य सूक्ष्मोऽपि धर्मस्वभावो नोपलब्धः, स तावत्समस्तधर्मनैरात्म्यावबोधस्वरूपा अनुत्तरा सम्पक्सम्बोधिः । तैर्थिक-शैक्षाशैक्षज्ञानाच्छ्रेष्ठत्वेनऽअनुत्तरा । सर्वभावानां तथताया यथावदधिगमस्वभावत्वेन उच्यते सम्यक्सम्बोधिरित्यर्थः । तत्र सर्वधर्माणामनुपलब्धिहेतो "न" इत्युक्तं । यतो ह्यसत्त्वं ततोऽनुपलम्भः । विद्यमानत्वे नानुपलब्धिः, सत्सु सर्वधर्मेषु तथागतस्य आलम्बनज्ञानस्यैव ज्ञापकत्वात् । अनेन धर्मनैरात्म्यावबोधस्वभावो निर्दिष्टः ।

(२०३)

साम्प्रतं पुद्गलनैरात्म्यावबोधस्वभावं प्रतिपादयितुं अपि तु खलु पुनः सूभूते इत्याद्याह । समाः स धर्मः इति तदवबोधितेषु सर्वधर्मेषु पुद्गलनैरात्म्यसाम्यात् । न तत्र किञ्चिद्विषमं इति सर्वत्र तदविपर्ययात्, आत्मग्राहहेतोर्भावाभिनिवेशस्य प्रहीणत्वात् । भगवता तावदात्मग्राहः सवासनः प्रहीणः । तेन सैव पुद्गलनैरात्म्यज्ञानस्वभावा सम्बोधिः, अनुत्तरा सम्यक्सम्बोधिरित्युच्यते, नान्या । केन रूपेण समः स धर्म इत्यत्र निःसत्त्वत्वेन इत्याद्याह । अनेन सर्वेण कथं योगसमापत्त्या प्रतिपत्तव्यमिति तन्निर्दिष्टं । सा

कथमभिसम्बुद्ध्यत इत्याह कुशलैर्धर्मैः इति । सा पुण्यज्ञानसम्भारात्मकैः कुशलैर्धर्मैरभिसम्बुद्ध्यत इत्यर्थः ।

यद्यसत्त्वादणुरपि धर्मो नोपलभ्येत, कथं नाम भवेयुः कुशला धर्माः? यतस्तैरभिसम्बुद्ध्यतेऽतः कुशला धर्माः इत्याद्याह । परमार्थास्तु अर्धमा एव । संवृतौ सत्त्वात्कुशला धर्माः इत्युक्तं । तस्मात्कुशलेर्धर्मैरभिसम्बुध्यत इत्यत्र नास्ति दोषः । अनेन अध्यारोपापवादान्तग्राहविक्षेपनिराकरणेन चित्तप्रग्रहो निर्दिष्टः । एतैः सर्वः स्थानैः गाम्भीर्यमपि सन्दर्शितं । अशेषपुद्गलधर्मनैरात्म्यावबोधरूपस्य सम्यक्सम्बोधिस्वभावस्य परिदीपनेन औदार्यमपि दर्शितं ।

३. महाधर्मार्थप्रज्ञप्तिः

भगवतः सा सम्यक्सम्बोधिः कथं वेदित्वया? इति विचार्यमाणे महार्थधर्मतया प्रज्ञापितत्वेन तत्सत्तां दर्शयितुं यश्च खलु पुनः सुभूते (२०४) इत्याद्याह । सुमेरवः पर्वतराजानः इत्युपलक्षणं । अनन्तलोकधातून्रत्नैः परिपूर्य दानेन यत्पुण्यं तदपि उपमां नैव क्षमते । इतः प्रज्ञापारमितायाः इत्युपलक्षणमात्रपरिदीपनेन सकलो महायानधर्मः परिलक्षितो भवति । यावदिति वचनेन सहस्रतमी कला-ऽशतसहस्रतमी कला ..... उपमा-औपम्यमित्येतानिऽ संगृहयन्ते । एवं महार्थधर्मप्रज्ञपनेन हेतुना भगवतश्चित्तसम्पदः सम्यक्संबोधेः आनुत्तर्यमवगम्यते, तथाविधसम्यक्संबोधिं अन्तरा तथाविधधर्मदेशनाया अशक्यत्वात् ।

तस्मादेतादृक्चित्तसम्पत्सम्पादने छन्द-प्रणिधानाभ्यां स्थातव्यं । सकलेनानेन कथं स्थातव्यं बोधिसत्त्वेनेति निर्दिश्यते, अनेनैवौदार्यमप्यभिहितं । सा च सम्बोधिः तथ्यसंवृतिस्वभावा द्रष्टव्या, न तु परमार्थतः, प्रागेवोक्तत्वात्, साक्षादनुक्तमपि सामर्थ्यतः योगसमापत्तिः, चित्तप्रग्रहः गाम्भीर्यं च निर्दिष्टं ।
४. महाववादार्थप्रज्ञप्ति ः

भगवतो लोकोत्तरज्ञानावस्थायां सत्त्वसंज्ञा सर्वथा न प्रवर्तते, अत्यन्तसमाहितत्वात्, अदो नाश्चर्यं । सत्त्वेभ्यो विमुक्तयुपदेशकालेऽसमाहितावस्थायां विशुद्धलौकिकज्ञानावस्थायामपि सत्त्वादिसंज्ञा न प्रवर्तत इति तन्निर्दिश्य अववादमहार्थत्वेन प्रज्ञप्तिहेतुना भगवतोऽनुत्तरचित्तसम्पदं (२०५) प्रतिपत्स्यमानां दर्शयितुं महार्थाववादमधिकृत्य तत्किं मन्यसे सुभूते इत्याद्याह । प्रश्नस्योत्तरमप्रतीक्षमाणः सपदि स्वतः न खलु पुनः सुभूते, एवं द्रष्टव्यं इत्याद्याह । तस्माद्भगवतश्चित्तसम्पदस्तादृशे महार्थाववादहेतौ बोधिसत्त्वेन छन्दप्रणिधानाभ्यां स्थातव्यमिति निर्दिष्टं ।

किं सत्त्वानां सत्त्वेऽपि संक्लेशहेतुभूततया तथा नाभिप्रेयते तथागतेन? आहोस्वित्सत्त्वाभावादिति चिन्तयतामाशयं विज्ञाय तत्कस्य हेतोः? इति पप्रच्छ । स्कन्धात्मकस्य पुद्गलात्मकस्य च कस्यचित्सत्त्वस्य परमार्थतोऽभावादेवं नोपलभ्यत इति दर्शयितुमाह- नास्तिं कश्चित्सत्त्वो यस्तथागतेन परिमोचितः इति । अनेन बोधिसत्त्वैः कथमत्र योगसमापत्त्या प्रतिपत्तव्यमिति तन्निर्दिष्टं ।

अभावः कथं ज्ञातव्य इत्यत्र यदि पुनः सुभूते इत्याद्याह । अयमत्राभिप्रायः यथाज्ञेयं तथागतस्य ज्ञानं प्रवर्तते, अन्यथा अप्रहीणावरणत्वेन कथं स्यात्तथागतत्वं । तस्माद्यदि सत्त्वः स्यात्तदा सन्दृश्येत स तथागतेन, आत्मनः प्रत्यक्षोपलब्धतया विचिअकित्साभावात् । स एव तावत्तस्य प्रगाढः आत्मग्राहः स्यात् । ततश्च आत्मग्राहहेतुतः समुत्पन्नं निखिलक्लेशजालबन्धनमप्यतिदृढं स्यात्तदा रागाद्यतिप्रगाढबद्धस्य आवरणाप्रहाणेन भगवतः तथागतपदप्राप्तिर्न स्यात् । भगवता च तत्पदं प्राप्तम्, अतः प्रहीणसकलावरणः सः । प्रहीणावरणया अशेष आत्मग्राहशिखरी विशीर्यते, तस्मात्सत्त्वाभावो न ज्ञायते ।

आत्मन्यसति किमात्मदृष्टिलक्षण आत्मग्राहो न भवति? किमर्थं भगवता आत्मादिसंज्ञा नोच्यते? इत्यत्र आत्मग्राह इति सुभूते इत्याद्याह । यदि (भगवता) आत्मादिवस्तुन एव ग्रहणं स्यात्तदा प्रहीणावरणस्य तस्य भगवत (२०६) आत्मग्राहः समुद्भवेत्, कस्याप्यात्मग्राहस्याभावातग्राह एष तथागतेन भाषितः ।

अथ कीदृश आत्मग्राह इति? स च इत्याद्याह । श्रवणादिविरहाद्हेयोपादेययोरनभिज्ञत्वाद्बालाः, प्रेक्षावत्त्वावियोगादाअर्येभ्यः पृथक्त्वाच्च पृथग्जनाः । पृथग्जना अपि केचित्सच्छास्त्रं श्रुत्वा योनिशोमनस्कारस्थिताः धर्मनैरात्म्याधिमुक्ताः सत्यमभिनिविशन्ते, तदनात्मग्राहव्यवच्छेदतो बाला इत्याह । बालमात्रकथनात्स्कन्धाद्यभिज्ञा अपि तादृशाः पृथग्जना अनुपजातार्यमार्गतया बाला एव । बालानां वैशिष्टयमभिधातुं व्यावृत्तेऽप्यात्मग्राहे बालत्वेन तेष्वात्मग्राह इत्यवभासते, तस्मात्तदाशयवशादात्मग्राह इत्येवं निर्दिष्टं ।

न तन्मात्रेण सत्यम्, अतिप्रसङ्गात् । अनात्मशब्दप्रयोगेणापि कथं नात्मादीनां सत्यग्रहणम्, यद्यात्मा न स्यात्तदा के तावत्पृथग्जना अभिधीयेरन्? इति विचिन्त्य बालपृथग्जनाः इत्याद्युक्तं । परमार्थतस्तु अजना एव, संवृतिमाश्रित्योक्तत्वान्न दोषः । एभिः सर्वैरध्यारोपापवादान्तनिराकरणेन चित्तप्रगृहीत्तत्वं दर्शितं । अनेन सर्वेण तावत्साक्षाद्गाम्भीर्यं प्रोक्तं । अशेषसत्त्वधातुभ्यो महार्थाववदप्रज्ञप्तेर्हेतुत्वदर्शनेन चित्तसम्पद आदौर्यमपि निर्दिष्टं ।

५. धर्मकायपरिग्रहणं ः

यदि बालपृथग्जनाः न स्युः, कथं तथागतस्य लक्षणानुव्यञ्जनैरलङ्कृताः कायसम्पदः सम्भवेयुः? पृथग्जनाः स्वकरुणामूलकबोधिचित्तमुत्पाद्य पारमितासु प्रयतन्ते (ततश्च) लक्षणादिभीरलङ्कृतास्तथागतकायसम्पत्तिवन्तो भवन्ति, तदभावे मूलभावात्कथं भवेयुः तादृयस्तथागतकायसम्पद इति? ये पारिषद्याः (२०७) कृतानल्पविकल्पाः रूपादिषु भावाभिनिवेशेनैवं चिन्तयन्ति, तेभ्यो धर्मकायपरिग्रहमधिकृत्य तत्किं मन्यसे सुभूते इत्याद्याह । पूर्वं धर्मकायतया न व्यवस्थापितम्, इदानीं धर्मकायं व्यवस्थापयितुमुक्तत्वान्न पुनरुक्तिदोषः ।

लक्षणसम्पदा तावत्परमार्थविचारणायामवयविनः परमाणुसंघातस्य वा स्वभावेनानुपपत्तिं विदित्वा पूर्वकमेवाभिप्रायं गृह्णन्सुभूतिराह नो हीदं । एवमेव उपपत्त्यन्तरं भगवता सचेत्पुनः सुभूते इत्यादिनोक्तं ।

यदि तथागतो लक्षणसम्पन्मात्रेण प्रभावितः स्यात्तदा वक्ष्यमाणहेतुना तुल्यत्वाद्राजापि चक्रवर्ती कथं न भवेत्तथागतः? ननु स्थानस्थोत्तप्तपूर्णत्वेन विशिष्टा भगवतो लक्षणसम्पद्, न तु चक्रवर्तिनः, ततः स नोच्यते तथागत इत्यपि न युज्यते, स्थानस्थादिविशेषस्यापि जडस्वभावत्वे नास्ति कश्चिद्विशेषः । तेन यदि तथागतो जडस्वभावैर्लक्षणादिधर्मैः प्रभावितोऽभविष्यत्तदा चक्रवर्ती अपि तथागतोऽभविष्यतिति चेत्? न, तस्मात्तथागस्तावदशेषवस्तुस्वभावस्य यथावदधिगममात्रेण प्रभावित इत्यभिप्रायः । अनेन तथाविधं ज्ञानहेतुकं तथागतकायं प्रति बोधिसत्त्वेन छन्दप्रणिधानाभ्यां स्थातव्यमिति निर्दिष्टं ।

अधुना परमार्थतस्तत्तथागतज्ञानेऽपि नाभिनिवेष्टव्यमिति दर्शयितुं धर्मकायो (२०८) व्यवस्थाप्यते । बोधिसत्त्वेन कथं योगसमापत्त्या प्रतिपत्तव्यमिति द्वाभ्यां गाथाभ्यां प्रदर्श्यते ।

तत्र पूर्वगाथया कथं तथागतो न द्रष्टव्यः, कैश्च न दृश्यत एतन्निर्दिष्टं । कथं न द्रष्टव्य इति चेत्? दर्शनादिव्यवहारप्रज्ञप्त्या । के न पश्यन्तीति चेत्? मिथ्याप्रहाणप्रसृताः । रूपेण चाद्राक्षुः इत्यनेन रूपेऽभिनिविष्टाः पुद्गलाः पारमार्थिकलक्षणादिभिरलङ्कृतं धर्मरूपं पुद्गलरूपं च पश्यन्तीति व्यवहारप्रज्ञप्तिर्निदिष्टा । घोषेण चान्वयुः इति मां शब्देन एवमेव स तथागत इति ज्ञातवन्त इत्यर्थः । अनेन श्रवणव्यवहारप्रज्ञाप्तिर्निदिष्टा । उपलक्षणमात्रमिमौ व्यवहारौ । तेन विशेषभेदो विज्ञानं चापि संगृहीतं ।

मिथ्याप्रहाणप्रसृतास्ते जनाः तावद्वितथामार्गस्थितत्वान्न मां सम्यग्रूपेण द्रक्ष्यन्ति । प्रहीयतेऽनेनेति प्रहाणं मार्ग इत्युच्यते, तच्च विपरीतत्वान्मिथ्या । तदप्यदर्शनहेतुः ।

अथ कथं बुद्धा द्रष्टव्या इत्यत्र धर्मतः इत्याद्याह । धर्माणां यो ह्यकृत्रिमः स्वभावः, सऽधर्मताऽ इत्युच्यते । सा च युक्त्यागमाभ्यां सिद्धत्वादादितः शान्तादिस्वभावा । सैव तथता, धर्मधातुः, भूतकोटिः, अनिमित्तं परमार्थश्चेत्यादिपर्यायैरुच्यते ।

सर्वत्र तथाभावात्ऽतथता तदालम्बनेन सर्वे बुद्धधर्माः सम्भवन्ति । तद्धेतुभूतत्वाद्ऽधर्मधातुऽ अविपरीतत्वाद्भूतः, तत्पर्यन्तत्वाद्भूतकोटिः । (२०९) तत्र नीलादिसर्ववस्तुनिमित्तानामभावादनिमित्तं । परमस्य ज्ञानस्य गोचरत्वात्परमार्थः । किमिति सा धर्मतया द्रष्टव्येत्यत्राह- धर्मकायाः इति । स्वभावार्थः कायशब्द उच्यते । तेनायमर्थः- सम्यग्ज्ञाननिबन्धना ये तथागतेषु व्यवस्थापितास्ते परमार्थतो धर्मस्वभावाः । यो यत्स्वभावः, स तत्स्वभावेन द्रष्टव्यः, न त्वन्यस्वभावेन । यद्येवं तर्हि धर्मता प्रकाशस्वभावा भवेत्, अन्यथा कथं तल्लक्षितास्ते द्रष्टुं शक्यन्त इति विचार्य धर्मता इत्याद्याह ।

किमशक्यत्वादपरिज्ञेया अथवा परिज्ञाने दोषसद्भावादिति विचिन्त्य न शक्या इत्याद्याह । धर्मिस्वभावे सिद्धे तद्धर्मता विज्ञातुं शक्यते, यदा धर्मिस्वभाव एव कश्चित्परमार्थतो न सिद्धस्तदा कथं सा धर्मतापि विज्ञातुं शक्यते केवलया स्वसन्तत्या । नास्ति सा केवलेत्यभिप्रायः ।

यद्येवं सम्यग्ज्ञानस्वभावानां बुद्धनामपि धर्मिणां परमार्थतोऽसिद्धत्वान्न स्याद्दर्शनम्, तत्कथं धर्मता द्रष्टव्येति चेत्? नैष दोषः । ये परमार्थतः सर्वधर्मिणो न पश्यन्ति त एव धर्मतां पश्यन्ति । धर्मता तावदनुत्पन्नस्वभावा, सा कथं तद्विपरीतोत्पादग्रहणेन ग्राह्या, न हि घटग्रहणेन तदनुत्पादग्रहणं । अनेन तथागतो न रूपकायेन द्रष्टव्यः, अपि तु धर्मकायेन द्रष्टव्य इत्येतन्निर्दिश्यते ।

असत्यपि तथागतस्य लक्षणसम्पत्स्वभावत्वे युज्यत एव लक्षणसम्पद्धेतुकं तथागतस्यानुत्तरसम्यक्सम्बोधिलक्षणम्, गणकैः (लक्षणज्ञैः) बोधिसत्त्वस्य लक्षणसम्पदं द्रष्ट्वा भगवाननुत्तरसम्यक्सम्बोधौ व्याकृत इति (२१०) येषां संशयः, तत्परिहारार्थं तत्किं मन्यसे सुभूते इत्याद्याह । यदि लक्षणसम्पदनुत्तरसम्यक्सम्बोधेर्हेतुः स्यात्तदा चक्रवर्तिनोऽपि स्यादित्यभिप्रायः । गणकैस्तावत्तथाविधं लक्षणमात्रं द्रष्ट्वा व्याकृतम्, न तु हेतुमित्यदोषः ।

अनेन चित्तप्रग्रहीतत्वं निर्दिष्टं । अनेन तावत्सकलेन स्थानेन गाम्भीर्यं दर्शितं । संवृतौ चाशेषवस्तुस्वभावाधिमगलक्षणस्य तथागतज्ञानस्य निर्देशेन आउदार्यमपि निर्दिष्टं ।

६. संसारे निर्वाणे चाप्रतिष्ठानं ः (अ) निर्वाणेऽप्रतिष्ठानम्

परमार्थतः सर्वधर्माणामभावाद्यदि सा धर्मता विज्ञातुं न शक्यत इति चेत्तत उच्छेदवादी भवान्स्यात् । ततश्च तथागतस्याप्यभावादप्रतिष्ठितनिर्वाणमपि न सिध्यतीति यदाशङ्कितं तदर्थं संसारनिर्वाणयोः अप्रतिष्ठानमधिकृत्य सुभूते ..... एवं ..... बोधिसत्त्वयानसम्प्रस्थितैः ..... इत्याद्याह । न च भूतविनाशोऽपि प्रज्ञप्तः, धर्मताया यथावदवबोधात् । अत एव चोक्तम्-

नापनेयमतः किञ्चित्प्रक्षेप्तव्यं न किञ्चन ।
द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते ।।

अनागते धर्मवृत्तिप्रतिबन्धकत्वेन उच्छेदोऽपि न प्रज्ञप्तः, यथाभूतधर्मताया देशनात् । सर्वे धर्मो अविचाररमणीयतया यथाभूतैः प्रत्ययैरुत्पद्यमाना अभ्युपेयन्ते, अतो भगवता बुद्धेन तथ्यसंवृतिस्वभावायाः माहाकरुणाया निर्माणादौ अधिपतित्वमादाय पुनर्विनेयेभ्यो यथावदुपायोपदर्शनेन (२११) निरवच्छिन्नसंसारप्रवाहोऽभ्युपेयते । अनेन भगवतो निर्वाणेऽप्रतिष्ठितत्वं निर्दिष्टं । तथाविधे भगवत्काये छन्दप्रणिधानाभ्यां स्थातव्यमिति तदपि निर्दिष्टं ।

(ब) संसारेऽप्रतिष्ठानं ः

यद्येवं भगवान्संसारप्रवृत्तिमभ्युपैति, तदा संसर्ता एव भवतीति विकल्प्य संसारेऽप्रतिष्ठितत्वं दर्शयितुं यश्च खलु पुनः सुभूते इत्याद्याह । निरात्मकेषु इति मायावत्परतन्त्रत्वात्, न स्वत आत्मभावः, नित्यस्य क्रमक्रमाभ्यां हेतोर्विरोधात्, अहेतुकस्य अकिञ्चित्करत्वात् । स्वपरयोर्नाधिष्ठानमपि, अधिष्ठातुरेवासम्भावात्, तस्मात्सर्वधर्मास्ते उभयविधाः निरात्मकाः ।

यथोक्तं ः "आत्मा आत्मेति भिक्षवो बालोऽश्रुतवान्पृथ्ग्जनः प्रज्ञप्तिमनुपतितः, न त्वत्रात्मा वा आत्मीयं वा ।" अनेन सर्वधर्मेषु पुद्गलनैरात्म्क्षान्तिः सन्दर्शिता । अनुत्पत्तिकेषु इत्यनेन धर्मनैरात्मक्षान्तिनिर्दिष्टा ।

यदि भावानामुत्पादो भवेद्, अहेतुको वा भवेत्, सहेतुको वा । सहेतुकेऽपि नित्यहेतुको वा अनित्यहेतुको वेति विकलद्वयं । तत्र न तावत्(२१२) प्रथमो विकल्पः कादाचित्कत्वप्रतीतेः । निरपेक्षस्य सदसदवस्थासमत्वेन सर्वत्र निर्विशिष्टत्वान्नित्यं सत्त्वमसत्त्वं वा स्यात् ।

अतश्च कादाचित्कत्वसम्भवाद्द्वितीयोऽपि पक्षस्तावन्न युज्यते । नित्यस्य इतरैः सहकारिभिस्तावन्न कश्चित्सामर्थ्यविशेषः क्रियते । कुत्रचिदप्यनपेक्षः सन्किमिव क्रमेण कार्यमुत्पादयेन्न युगपदिति । कारणेऽविकाले न कादाचित्ककार्यतिरोधानं युज्यते । कथं क्रमेणोत्पादः स्यादिति ।

ये स्वहेतुं भावानां वदन्ति, तेऽप्यर्थतोऽभावादेवभ्युपगच्छन्ति । स्वभावे सिद्धे हेतुरपि स्यान्न त्वसिद्धे, सर्वसामर्थ्यविरहलक्षणत्वात्तस्य । स्वाभवे सिद्धे तस्याहेतुकसिद्धिरेवाभ्युपगता स्यात्, तदितरान्यहेतौ चानभीष्टे कथं न निर्हेतुकः स्यात् । न भावः स्वभावाद्भिन्नः । अतः सिध्यति तत्सिद्धे, (फलतः) अहेतुक एव स्यात् । अन्यथा तत्सिद्धेऽप्यसिद्धत्वात्कथं तदभिन्नस्वभावत्वं । ततो योऽहेतुवादी पक्षो निरस्तः, स अत्रापि तुल्यः ।

न तावद्युज्यते तृतीयपक्षोऽपि समानासमानकालयोः कारणत्वविरोधात् । तथा हि, हेतौ सति स फलेन (कार्येण) समानकालो वा भवेद्भिन्नकालो वा? न तावत्समानकालात्, स्वयप्राप्तात्मस्वभावस्य सर्वसामर्थ्यशून्यत्वात्कुत्रापि फले योगाभावात् । आत्मस्वभावे च (प्राप्ते) तत्स्वभाववत्फलस्यापि तत्समानकालभावितया आत्मस्वभावत्वमेव । न तत्र फलं युज्यते ।

(२१३)
भिन्नकालेऽपि तावत्तदितरकालव्यवधानेन वा भवेद्, यथावैभाषिकैर्विपाकहेतुरिष्यते, तथा । अथवा अव्यवधानेन वा भवेद्, यथासौत्रान्तिकैः कार्यकारणयोरुत्पादविनाशौऽतुलादण्डोन्नामावनामवद्ऽ उच्येते तथा स्यादिति? तत्र तदितरकालव्यवधानेन फलोत्पादे सति विनाशादेवोत्पादः अभ्युपगम्येत, सर्वसामर्थ्यविरहितत्वात्तस्य विनाशस्य न युज्यते हेतुभावत्वम्, अन्यथा अकारकस्य विनष्टवस्तुनो विनाशात्कथं (उत्पादः) भवेत् ।

अव्यवधानेनेति पक्षेऽपि यदि सर्वात्मना अव्यबहितस्तदा तदेव समकालत्वं स्यात् । निरवयवयोर्द्वयोर्वस्तुनोः सर्वात्मना अव्यवहितत्वे एककालत्वातिरिक्ता नान्या गतिः । तस्मात्सर्वात्मना अव्यवहिते सति पूर्वं यथा अणुमात्रकं (इति प्रसक्तम्), तथैव कल्पस्यापि क्षणमात्रकत्वं दुर्निवारं ।

एकदेशेन चाव्यवहिते सावयवत्वं प्रसज्यते, अतः परमार्थतः सर्वे भावा अनुत्पन्ना एव । अविचाररमणीया मिथ्यात्वेनोत्पन्ना इव प्रतीयन्त एव, यथा भ्रान्तिज्ञाने प्रतिभासस्वभावाः । (यदि) न स्यात्प्रसिद्धमात्रं

प्रमाणं (तदा)ऽकार्यकारणयोरागोपालं प्रसिद्धत्वान्न युज्यते विमर्शः इति वादः कथं युज्येत, प्रसिद्धस्य रूपादेः प्रमाणतः विशीर्णत्वात् । तस्मादुक्तं भगवता चन्द्रप्रदीपसूत्रे (समाधिराजसूत्रम्)-

न चक्षु प्रमाणं न श्रोत्रग्राणं न जिह्वा प्रमाणं न कायचित्तं ।
प्रमाणं यद्येत भवेयुरिन्द्रियाः कस्यार्यमार्गेण भवेत्कार्यं ।।
(२१४)
यस्मादिमे इन्द्रिय अप्रमाणा जदा स्वभावेन अव्याकृतश्च ।
तस्माद्य निर्वाणपथैव आर्थिकः स आर्यमार्गेण करोतु कार्यं ।।

यत्प्रत्यक्षलक्षणमाहुराचार्यास्तच्च प्रत्यक्षं संवृतितः, परमार्थेऽवतारणाय द्रष्टव्यं । न च संवृतौ न समानपर्यनुयोगः, ततस्तस्य संवृतावुक्तत्वान्न परीक्षणं क्षमते । अतो भगवता शालिस्तम्बादिषु भावानां स्वपरोदयो निषिद्धः । तथोक्तं आर्यलङ्कावतारे-

"सदसतोरुत्पत्तिविरहितत्वान्महामते, सर्वधर्मा अनुत्पन्नाः ।"

विस्तृतप्रज्ञापारमितासुं चोक्तम्- "सुभूते, न कश्चिद्धर्म उत्पन्नः, सा (अपि) अनुत्पन्ना" तत्र या प्रज्ञा, सानुत्पत्तिकधर्मक्षान्तिरित्युच्यते ।

तथोक्तं रत्नाकरनाम(महायान) सूत्रे-

स्व एव यदा नास्ति परो हेतुः कथं भवेत् ।
स्वाभावात्कथमुत्पादः परस्मात्सुगतोऽवदत् ।।

अपि च,

भावा जायन्ति संवृत्या परमार्थेऽस्वभावकाः ।

यद्येतत्सर्वं परिकल्पितस्वभावमधिकृत्योक्तमिति चेत्? न, सर्वस्वभावानां प्रमाणतो निराकृतत्वात् । अनेनापरोऽल्पकुशलमूलोऽपि (जनो यदा) संसारदुःखं नानुभवति, (तदा) अनुत्पत्तिकधर्मक्षान्तिप्राप्तत्वात्महाज्ञानालोकोदया लब्धानुत्तरपुण्यस्कन्धा बोधिसत्त्वाः कथं संसारदुःखं अनुभवेयुरित्येवमावेदितं ।

(२१५)
द्विविधो हि संसारदुःखस्यानुभवः- कायिको दौर्मनस्यलक्षणश्च । तत्र पूर्वकस्तु पापकर्मणः फलम्, अपरस्तु मोहजः, विपर्यस्तज्ञानसम्भूत एव । तत्रानुत्पन्नेषु धर्मेषु क्षान्तिप्राप्त्या बोधिसत्त्वेषु नास्त्युभयविधो दुःखहेतुः, पापं मोहश्चेति । अकारणान्न सम्भवति दुःखस्पर्शविहारः । अनेन कथं बोधिसत्त्वेन प्रतिपत्तव्यमिति देशितं ।

उत्पादितबहुतरपुण्यस्कन्धा रूपावचरादिसत्त्वा इव किं (ते) संसार एव न भवन्ति? कथं वा बहुतरपुण्यस्कन्धोत्पादमात्रेण संसारेऽप्रतिष्ठितत्वं सन्दर्शितमित्याशङ्क्य पुनः सुभूते इत्याद्याह ।

अनेन तावदुत्पन्नपुण्यस्कन्धेऽपि तेषां मिथ्याभिनिवेशेन पुण्यस्कन्धपरिग्रहस्य सर्वसंक्लेशमूलविपर्यासस्याप्रहीणत्वम्, अतः (ते) विशिष्टगतिं प्राप्ता अपि संसारे व्यवस्थाप्यन्ते, बोधिसत्त्वानां तु अनुत्पत्तिकधर्मक्षान्तिप्राप्तेः पुण्यस्कन्धेषु नास्ति सत्याभिनिवेशः, अतस्तेषां सर्वसंक्लेशमूलसंमोहस्य प्रहीणत्वान्न संसारेऽवस्थानमित्येवं निर्दिश्यते । परविकल्पनिराकरणार्थमार्यसुभूतिरविदिताभिप्राय इव ननु परिग्रहीतव्यः इति विपरीतमभ्यधात् ।

तदयमाशयः- तत्तत्सूत्रेषु भगवताऽबोधिसत्त्वः पुण्यस्कन्धं परिगृह्णातिऽ इत्युक्तं । अत्र न परिग्रहीतव्यः इति वचनेन कथं न विरोध इति? भगवानपि येनाभिप्रायेणोक्तवान्तदुभयमपि दर्शयितुमाह- परिग्रहीतव्यः इति । परिग्रहीत इति यदाह तत्तु परिग्रहलक्षणनय उपसंहारलक्षणः ।

विपरीतग्राहकलक्षणनिराकरणेन नात्र विरोधः । वितथमार्गग्राहकत्वं विपरितग्रहणमित्यनेन तद्विकल्पप्रहणाच्चित्तप्रग्रहणं दर्शितं । यश्च खलु- (२१६) पुनः सुभूते, कुलपुत्रो वा कुलदुहिता वा प्रारभ्य औदार्यमुक्तम्, अवशिष्टपूर्वभागैर्गाम्भीर्यं निर्दिष्टं । एतेन सकलेन स्थानेन शाश्वतोच्छेदान्तं परिहृत्य मध्यममार्गो देशितः, निर्दिष्टं च संसारे निर्वाणे चाप्रतिष्ठितत्वं ।

७. प्रस्थिति-परिशुद्धिः

प्रस्थितिः परिशुद्धिरुच्यते । त्रिविधस्तस्याः प्रभेदः- १. ईर्यापथेन प्रस्थितिः, २. सत्त्वभाजनलोकाधिपत्येन प्रस्थितिः, ३. असंक्लेशेन प्रस्थितिश्च ।

१. ईर्यापथेन प्रस्थितिः

तत्र यदि बुद्धो द्रष्टव्यो धर्मकायेन, न तु रूपकायेन, तदा भगवतश्चतुरीर्यापथेन जन्माभिनिष्क्रमणादिना चागमप्रसिद्धेन कथं न विरोध इति यो मन्यते तदर्थं प्रस्थानसम्पद ईर्यापथेन प्रस्थितिमधिकृत्य अपि तु खलु पुनः सुभूते यः कश्चिदित्याद्याह ।

गच्छति वा आगच्छति वा इत्येतद्द्वयेन चङ्क्रमणम्, तिष्ठति इत्यादिभिः क्रमेणावशिष्टा ईर्यापथा उक्ताः । ईर्यापथपिर्देशस्तूपलक्षणमात्रं तेन जन्मादीनामप्यत्र निर्देशो द्रष्टव्यः । भगवत आगमेन परिदीपितानामीर्यापथादीनां यः सम्यक्तया शब्दशोऽभिनिवेशस्तास्य विपरीताभिनिवेशान्न जानाति तथागतेन भाषितस्यार्थं ।

(२१७)
न च भगवान्नूपकायेन प्रभावितः, असौ तु ज्ञानपरिशुद्धः, तस्यामूर्तत्वाज्ज्ञानस्य संवृतावपि गत्यादयो न सम्भवन्ति । गत्यादयस्तु रूपस्कन्धस्य स्थानविशेषप्रभावितत्वात् । ते च भगवतो

निर्माणकायमाश्रित्योक्ताः, न च ज्ञानकायमाश्रित्य, तत्र संवृतितः परमार्थतो वा गत्यादीनामसम्भवात् । तस्मादेवंविधायां ईर्यापथप्रस्थितौ बोधिसत्त्वेन छन्दप्रणिधानाभ्यां स्थातव्यमिति सन्दर्शितं ।

यदि तथागते गत्यादयो न संविद्यन्ते (तर्हि) कथं तथागतः इति गत्या प्रभावित इवोच्यत इति चित्ताशयं वितर्क्याह- तत्कस्य हेतोः? इति । न मे स भाषितस्यार्थमाजानाति इत्यनेन योजनीयं । अत्रोत्तरार्थं तथागतः इत्याद्याह ।

एवमभिप्रेयते- व्यपदेशोऽयं न गत्या प्रभावितः, अपि तु अधिगमेन प्रभावितः गतः इत्यस्याधिगत्यर्थत्वात् । वस्तुतत्त्वं यथास्थितिः, तथैवाधिगम्यते, अधिगतत्वात्तथागतः । अथवा पूर्वकैर्बुद्धैर्यथा वस्तुतत्त्वमधिगतमविपर्ययेण तथैवानेनाप्यधिगतमित्यधिगतत्वात्तथागतः । स च तथ्यसंवृतौ ज्ञानकायत्वेन युज्यते, न चान्यत्राविकल्पितत्वात् । तच्च गमनादि क्वचित्संवृतावपि न सम्भवति, अमूर्तत्वात् । परमार्थे तु न सम्भवतितराम्, अनुत्पन्नत्वात् । ततः स वस्तुस्वभावाधिगत्या समस्तलोकस्य ज्येष्ठत्वात्पूजनीयत्वातर्हनित्युच्यते, सम्यगवबुद्धत्वात्सम्यक्सम्बुद्धः इत्युच्यते, अन्यथात्वेन जडस्वभावेन रूपकायस्तु तथा नोच्यत इति भावः ।

अनेन योगसमापत्तिः चित्तप्रग्रहश्च सन्दर्शितः । अनेन तावत्सकलस्थानेन गाम्भीर्यं निर्दिष्टं । संवृतौ तथागतस्य निर्माणकायमाश्रित्य अनन्तलोकधातुषु अप्रतिहतगमनादिप्रदर्शनेन आदार्यमपि प्रदर्शितं ।

(२१८)

२. (अ) भाजनलोकाधिपत्येन प्रस्थितिः

यस्तथागतस्य निर्मितरूपकायः, यश्च मनोमयकायः, तस्यापि एकानेकस्वभावविसंयोगान्मायानिर्मितबुद्धवत्मृषात्वं दर्शयितुं भाजनसत्त्वलोकभावविगमात्प्रस्थितिमधिकृत्य यश्च खलु पुनः सुभूते इत्याद्याह । पूर्वं त्वधिमुक्तिचर्याभूमौ बोधिसत्त्वस्याभावो दर्शितः, सम्प्रति बुद्धभूमौ भगवतः प्रस्थितिदर्शनान्न पुनरुक्तिः ।

अत्र पुनद्विविधेनोपायेन एकानेकस्वभावावियोगावबोधान्नैरात्म्यं दर्शितं । तद्यथापि नाम मषिं कुर्यात्..... परमाणुसञ्चयः इत्यनेन एकानेकस्वभावावियोगावगमेन तनुकरणोपायो दर्शितः । अत्रापि पूर्ववद्व्याख्यानं (वेदितव्यम्) । ननु दिग्भागभेदेन परमाणवोऽसिद्धा (तदा) कथं ते सञ्चिताः? इति सञ्चिन्त्य तत्कस्य हेतोः? इत्याशङ्क्योत्तरमाह (परिहरन्नाह) सचेद्भगवनिति विज्ञय एकत्वग्राहकनिवृत्युपायार्थमेव परमाणुप्रभेदेन (यः) सञ्चयः स उक्तो न तु परमार्थतोऽनवस्थितत्वात्, अन्यथा परमाणुसञ्चयः सर्वत्र प्रत्यक्षत्वेन प्रसिद्ध्येत । तस्मात्न भगवानवक्ष्यत्परमाणुसञ्चय इति अभाषितेऽप्येवमाख्यातत्वात् । अनेन तथागतस्य रूपाभावत्वेन तादृश्यां स्थितौ छन्द-प्रणिधानाभ्यां स्थातव्यमिति देशितं ।

यदि न स्यात्सञ्चयः (तदा) अपि नु बहुः स परमाणुसञ्चयो भवेत्? इति कस्माद्भगवानवक्ष्यदित्याशयं विदित्वा तत्कस्य हेतोः? इत्याह । असञ्चयः सः इति पूर्वोत्तरादिदिग्भागभेदेन अवस्थितानां तेषां परमाणूनां स्वभावेनासिद्धत्वान्न युज्यते तत्त्वतः सञ्चयः । एकत्वग्राहनिराकरणायैव (२१९) भाषितं तेनोच्यते परमाणुसञ्चय इति ।

असति च दिग्भागभेदे परमाणवः परमाण्वन्तरैः पूर्वापरोर्ध्वाधोदिग्भागभेदेन परिवृता न स्युः, ततो न भवेदुपचयश्चित्तचैत्तादिवत् । भाग एव भवति परमाणुरित्यपि कथनं न युज्यते, तत्रापि तर्कसाम्यात् । एवंभूतेनिष्ठितोऽपि न युज्यते । अनिष्ठिताः परमाणवः स्वभावेन तर्हि त्वया किं साध्यते? अनिष्ठितस्वभावे भावो न सिध्यति, ततः सिद्धमस्माकं मतमिति । अनेकस्वभावत्वमणूनां यदृच्छयापि नोच्यते, (तदा) अनिष्ठिते परमाणौ (अनेकस्वभावत्वं) कथमुपपद्येतेति मयोक्तं । ये परमाणवस्त्वया निरवयवत्वेन व्यवस्थाप्यन्ते तेषां पूर्वोत्तरादिदिग्भेदाभ्युपेतत्वात्दिग्भागभेदेनाभ्युपगम्यन्ते, तेन सावयवाः [ते] प्रसज्यन्ते । ततः प्रसङ्गसिद्धो हेतोराश्रयासिद्धिः, न च केवलं चित्तचैतसिकाभ्यामनैकान्तिकाः, अमूर्तत्वात्ते न दिक्ष्ववस्थिताः, पूर्वोत्तरादिदिग्भिरपि नावतिष्ठन्ते ।

तेनोक्तम्-

(२२०)
न रूपे नैव नेत्रे च तयोर्मध्येऽपि न स्थितः ।
यत्र स्थितो भवेत्तत्र न सन्नैव हि चाप्यसत् ।।

अलं प्रसङ्गेनेति । अनेन त्वनेकस्वभावराहित्यमवगम्य निराभासोपायसन्दर्शनेन योगसमापत्तिश्चित्तप्रहश्चेति निर्दिष्टं । बहुः स परमाणुसञ्चयो भवेतित्यनेनौदार्यं चाभिहितम्, अवशेषेण तु गाम्भीर्यं ।

(ब) सत्त्वलोकाधिपत्येन प्रस्थितिः

सम्प्रति सत्त्वलोकाभावप्रस्थितिमधिकृत्य भाषितस्त्रिसाहस्रमहासाहस्रो लोकधातुरिति सः इत्याद्याह । भाजनलोकस्य पूर्वमुक्तत्वादत्र लोकधातुस्तावत्सत्त्वलोकत्वेनेष्टः । उभयत्र त्रिसाहस्रमहासाहस्राभिधानेन तावदनन्तलोकधातुरुपलक्ष्यते । अत एव अधातुः स तथागतेन भाषितः इति पञ्चस्कन्धात्मकः स सत्त्वलोकोऽप्येकानेकस्वभावविरहितः पूर्ववदुक्तः ।

अनेन तथागतस्य तथाविधायां सत्त्वलोकाभावप्रस्थितौ बोधिसत्त्वेन छन्दप्रणिधानाभ्यां स्थातव्यमिति निर्दिष्टं । निराभासेन तु योगसमापत्तिरियं कथं प्रतिपत्तव्येत्यपि सन्दर्शितं ।

इदानीं चित्तं कथं प्रग्रहीतव्यमिति दर्शयितुं तत्कस्य हेतोः? इति पृष्टवान् ।ऽअधातुः स तथागतेन भाषितऽ इत्यनेन योजनीयं । उत्तरार्थं सचेद्भगवनित्याद्याह । यदि सत्त्वलोको यथाप्रसिद्धस्तथा परमार्थतः स्यात्स्थूलैकस्वभावस्तदा तथागतेन यथास्थिति वस्तुतत्त्वमधिगतमिति स एव (२२१) पिण्डग्राहः स्यात् ।

स्कन्धेषु पिण्डग्राह एवात्मग्रहणहेतुः, स एव च तथागतस्य पिण्डग्राहोऽतिगाढतरः स्यात्, तदप्रहाणं चाभिप्रेतं भवेत् । न त्वेवम्, अत एवान्यत्र यो बालजनेभ्यः पिण्डग्राह आत्मग्राहस्य हेतुत्वेन भगवता भाषितः स परमार्थतोऽग्राह्य एव । ग्राह्ये हि पिण्डे एकानेकस्वभावस्य कस्यचिदभावात् । बालजनप्रसिद्धो भावः केवलं संवृतित उक्तः । तेनोच्यते पिण्डग्राह इति । तदर्थसाधनायैवं भगवान्पिण्डग्राअस्यार्थमुक्तवान् । किमुच्यत इति चेत्? व्यवहारे पिण्डग्राह इति परमार्थेऽभावात्स धर्मस्त्वनभिलाप्य इत्युक्तवान् ।

यद्येवं ग्राह्यः पिण्डो न स्यात्तदा तत्र ग्राहकस्याप्यभावात्कथं व्यवहारे पिण्डग्राह इति विचिन्त्याह- स च बालपृथजनैरुद्गृहीतः इति । बालास्तु भ्रान्तिवशादसन्तमपि सद्भूतमिव गृहणन्ति । तदाशयवशेन व्यवहारः प्रज्ञप्यते, (अतो) न विरोध इत्यभिप्रायः । तस्मात्ते बाला इत्युच्यन्ते, अन्यथा यथावस्तु व्यवहारप्रज्ञप्तौ कथं ते बालाः स्युः?

उक्तमत्र कथं चित्तं प्रग्रहीतव्यमिति । गाम्भीर्यमौदार्यमपि चात्र पूर्ववद्योजनीयं । अनेन यदा सर्वे भावाः परमार्थतः स्वभावशून्यास्तदा रूपकायः ज्ञानकायश्च कथं भवेत्परमार्थतः सस्वभावः, मूलसत्त्वस्याभावादिति देशितं ।

सम्प्रति यो हि कश्चित्सुभूते इत्यादिना सर्वस्थानेषु योगसमापत्तेः केनोपायेन सर्वत्र समाधेयमिति तत्प्रदर्श्यते । एवमनुसन्धिः- यदि नास्ति पिण्डग्राहस्तदा तन्मूलप्रभवायाः सत्कायदृष्टेरेवाभावात्कथं भगवान्पञ्चसु दृष्टिषु सत्कायदृष्टिमाहेति तदर्थं यो हि कश्चित्सुभूते इत्याद्याह । अत्र कथमविकल्प्यम्, यश्चाविकल्पकः, यमिन्नविकल्प्यम्, येनाविकल्पकः, यश्चाविकल्पः, तद्दर्शनेन योगसमापत्तेः सम्यगुपायो दर्शितो भवति ।

(२२२)
तत्र यो हि कश्चित्सुभूते इत्यारभ्य तेनोच्यते आत्मदृष्टिः एतत्पर्यन्तमनेन कथमविकल्प्यं तदुद्दिष्टं । कथमिति चेत्? उक्तोऽन्यैर्थिकैरात्मा, भगवता तु पुद्गलनैरात्म्यप्रतिपादनादात्मनिषेधार्थमाह आत्मदृष्टिः इति तस्याः आत्मदृष्टेर्निराकरणेन धर्मनैरात्म्यं व्यवस्थाप्यते अदृष्टिः सा तथागतेन भाषिता इत्युक्तं । तामात्मदृष्टिं यदि सत्यतो न गृह्णाति (तदा) एवं प्रयोगे बोधिसत्त्वो योगसमापत्तौ प्रवर्तते । यस्मादविकल्पकस्तस्मात्स तत्रावरणोपायः ।

एवं हि सुभूतेअ बोधिसत्त्वयानसम्प्रस्थितेन इत्यनेन योऽविकल्पकः स परिदीप्यते । सर्वधर्माः इत्यनेन यस्मिन्नविकल्प्यं तद्दर्शितं । ज्ञातव्या द्रष्टव्या अधिमोक्तव्याः इत्यनेन येनाविकल्प्यं तदभिहितं । केनाविकल्प्यमितिं चेत्? ज्ञानेन दर्शनेन अधिमुक्त्या च । तत्र ज्ञानं श्रुतमयी प्रज्ञा, दर्शनं चिन्तामयी प्रज्ञा, तयोपनिध्यानत्वाद्, अधिमुक्तिः भावनामयी प्रज्ञा, अध्याशयोऽत्राधिमुक्तिशब्देन वक्तुमिष्यते । सा तु भावनाबलेन सिध्यतीति, अत एव भावनमयी प्रज्ञा निर्वेधभागीयावस्थायामधिमुक्तिशब्देनोक्ता ।

तथा चाधिमोक्तव्या, यथा न प्रत्युपस्थामहे इत्यनेन योऽविकल्पस्तं दर्शयति । असंज्ञैषा तथागतेन भाषिता इत्यत्र हेतुः परिकीर्तितः । कस्यचित्संज्ञेयस्य अभावोऽपि, एकानेकस्वभावशून्यत्वात्परमार्थत सा असंज्ञा । संवृतिसत्यमधिकृत्यान्यत्र तथागतेन भाषितं । तस्या (२२३) मिथ्यार्थाधिगमावस्थायां कथं न स्यादविकल्प इत्यभिप्रायः । सर्वस्थानेषु योगसमापत्त्युपायोऽभिहितः ।

३. असंक्लेशेन प्रस्थितिः (अ) देशनासंक्लेशः

द्विधा तवदसङ्क्लेशः- देशनासंक्लेशः, संसारासंक्लेशश्च । तत्र यदि नास्ति धर्मसंज्ञा तदा तथागतस्य सत्त्वेभ्यो तद्धर्मदेशनासंज्ञासमुत्पादे कथं न भवेत्संक्लेशः? कृपया सत्त्वार्थं यावत्संसारावस्थाने सति धर्मसंज्ञया कथं न स्यात्संक्लेशः? इति विचिन्त्य तयैव चित्तसम्पदा देशनासंक्लेशं गाथया च संसाराक्लेशमावेदयितुं यश्च खलु पुनः सुभूते इत्याद्याह ।

पूर्वं प्रसङ्गान्तरे लोकधातुप्रशस्तिप्रदर्शनमनुशंसायाः प्रशंसनम्, सम्प्रत्यसंक्लेशाधिकारेऽनन्तलोकधातुदेशनया नोच्यते अनुशंसेति न पुनरुक्तिः । अत्रापि युक्तिस्तु प्राग्वद्वक्तव्या । उद्गृह्य इति स्वध्यायेऽधीतम्, धारयेतिति पदम्, वाचयेतिति पुस्तकासिकं वाचयेत्, पर्यवाप्नुयातिति त्वर्थग्रहणमित्यर्थः । अनेन यमान्महार्थोऽयं धर्मस्तस्माद्बोधिसत्त्वेनैवंविधायां महार्थधर्मदेशनायामवश्यमेव छन्द-प्रणिधानाभ्यां स्थातव्यं तत्परिदीपितं ।

भाष्यमाणायामपि कथं न स्यात्संक्लेश इत्येतद्दर्शयितुं कथं न सम्प्रकाशयेतित्याह । अयमभिप्रायः- परमार्थतोऽनुत्पन्नत्वेनभिलाप्यत्वेन देशितत्वेऽपि सर्वधर्माणाम्, ते धर्मा अनभिलाप्यस्वभावेन नोच्यते । एवमुक्तम्- यथा विनेयजनास्तथा सर्वे धर्मा आदितोऽनुत्पन्नत्वादनभिलाप्याः (२२४) तस्मान्न ते केनापि व्यपदेश्या इत्येवं दर्श्यत इति । तथा सति असंक्लेशेन देशना, अविपरीतार्थत्वात् । अन्यथा संक्लिष्टा स्याद्विपरीतदेशनत्वात् । अत एव तथागतो धर्मदेशनाकाले विशुद्धलोकज्ञाने प्रस्थितः, अतो धर्मसंज्ञाभाससमुद्भवेऽपि तत्त्वतोऽभिनिवेशाभावात्संक्लेशदोषाभावः । अनेन योगसमापत्तिः, चित्तप्रग्रहः गाम्भीर्यञ्च निर्दिष्टम्, पूर्वेण तावदौदार्यं ।

[ब] संसारासंक्लेशः

साम्प्रतं निखिलप्रज्ञापारमिताकायं व्यवस्थाप्य गाथया संसारासंक्लेशो देश्यते । अनया गाथया चत्वारि संस्कृतलक्षणानि परिदीपितानि । (तानि तावत्) स्वभावलक्षणम्, विषयरसास्वादनलक्षणम्, आदीनवान्वयलक्षणम्, निर्याणान्वयलक्षणं चेति ।

तत्र पञ्चस्कन्धात्मकानां भावानां यथाप्रतीति प्रतीत्यसमुत्पादस्तावद्हेतुप्रत्ययसंगृहितत्वात्संस्कृतं इत्युच्यते । एतेषां सर्वेषां स्वभावः तारकाः इव द्रष्टव्यः । रात्रौ यथा तारका अवभासन्ते, न तु दिवसे, तथैव संस्कृता अपि अविद्याज्ञानान्धकारे सति प्रतिभासन्ते, ज्ञानसूर्यालोके सति नावभासन्ते, अतः (ते)

तारकस्वभावा इव द्रष्टव्याः । पुद्गलधर्मदृष्टयभिनिवेशात्मकाः संस्कृतास्तु मिथ्याप्रतीतिहेतुत्वात्तिमिरवज्ज्ञातव्याः ।

विज्ञानलक्षणं च कर्मवर्तिकं तृष्णास्नेहं चाश्रित्य प्रज्वलनाद्दाप इव द्रष्टव्यम्, एवमेतन्निदर्शनेन संस्कृतस्वभावलक्षणं परिदीपितं । मायोपमया विषयरसास्वादनलक्षणं निर्दिश्यते, वितथावभासमानत्वात् । तत्रादीनवान्वयलक्षणं संस्कृतस्वभावं द्विविधम्- अनित्यान्वयः दुःखान्वयश्च । अवश्यायोपमया अनित्यतान्वयः प्रदर्श्यते, न चिरं स्थितत्वात् । बुदबुदोपमया तावद्(२२५) दुःखतान्वयः प्रदर्श्यते, वेदना बुदबुदोपमा इति, या काचिद्वेदना सेह दुःखमिति भाषितत्वात् ।

त्रिविधैः दुखैः सर्वा वेदना दुःखा वेदितव्या । तत्र दुःखवेदना तावद्दुःखदुःखम्, तत्सहिता ये संस्कारास्तेऽपि तदनुरूपतया दुःखमेव; सुखावेदना तावद्विपरिणामदुःखेन दुःखम्, तत्सहिता ये धर्मास्तेऽपि तदनुरूपतया दुःखम्, न दुःखा न सुखा वेदना, तत्सहितानि वस्तूनि च संस्कारदुःखम्, उत्पादभङ्गलक्षणत्वेन तानि दुःखं । एवं सर्वं संस्कृतं दुःखान्वितं द्रष्टव्यं ।

तत्र निर्याणान्वयलक्षणं तावत्पुद्गलधर्मशून्यतान्वयम्, तदालम्बननिर्वृतत्वाद्भगवता खलु द्विविधंनिर्याणालम्बनमुक्तं । आर्यसमाधिराजसूत्रेचाप्युक्तं ः

नैरात्म्यधर्मान्यदि प्रत्यवेक्षते
तान्प्रत्यवेक्ष्य यदि भावयेत ।
स हेतुर्निर्वाणफलस्य प्राप्तये
यो अन्यहेतुर्न स भोति शान्तये ।।

द्विविधनैरात्म्यसम्प्रयुक्ताः सर्वसंस्कृताः, तथा हि- अतीत-प्रत्युत्पन्न-अनागतभेदेन त्रिविधाः संस्कृताः । तत्र ये तावदतीतास्ते स्मृतिमात्रावस्थिता अतो निःस्वभावत्वेन, धर्म-पुद्गलतया शून्याः आत्मनानधिष्ठितत्वात्, ततश्च स्वप्नौपम्येन द्विविधनैरात्म्यान्वयास्ते व्यपदिष्टाः । प्रत्युपन्ना विद्युदौपम्येन एकानेकस्वभावरहिताः अग्राह्यस्वभावत्वदिति तेनान्विता व्यपदिष्टाः । (२२६) अनागतास्तावदलब्धस्वभावाः, अभ्रौपम्येन आकाशसमचित्ते तद्बीजदौष्ठुल्येन जनितत्वादिति नैरात्म्यद्वयं तावद्देशितं ।

अतोऽनेन खलु समग्रेणात्र बोधिसत्त्वैः सदा सर्वसंस्कृतस्वभावमेवं विचार्य छन्द-प्रणिधानाभ्यां स्थातव्यमिति परिदीपितं । निर्याणान्वप्रदर्शनेन तावद्योगसमापत्तिश्चित्तप्रग्रहश्च निर्दिष्टः । अनेन सम्पूर्णेनस्थानेन गाम्भीर्यञ्च व्यपदिष्टं ।

गाथायामस्यां तावदिदं परिदीप्यते- संक्लेशमुलं तावद्विपर्यासः । अतः संस्कृतस्वभावेष्वनेकशः केनचिद्विचारयता मनसिकुर्वता अप्येवं संस्कारपरिज्ञानाद्यदा विपर्यासाभावात्न भवति संक्लेशं (तदा) कथं (नाम) यथावदशेसवस्तुस्वभावपरिभावको विधूताशेषविपर्यासजालस्तथागतः संक्लिष्टो भवेत् । अत एव

समस्तसंस्कृतदोषानवगच्छन्तथागतः, पद्ममिव संसारदोषाम्भसानवलिप्तचित्तः, प्रतिज्ञातसमस्तजगत्समुद्धरणाशयः, सफलकारित्रः, महाकरुणान्वितचित्तः, निरवधिजगद्धितसुखसाधनाभिप्रायेण संसारचक्रसंसरणं यावत्प्रतिष्ठितो वेदितव्यः । तथा चोक्तम्-

कर्तुं लोके सुखं शान्तौ भवे चाप्यनधिष्ठितः । इति सर्वसत्त्वानवलोकितुं भूमावस्थीयत इत्यप्युक्तं ।

त्रैयध्विकानां जननी मुनीनां ख्याता यथाशक्ति मया ततो जगत् ।
विपुलेन पुण्येन वियत्समेन विधूय चान्ध्यं सुगतत्वमाप्नुयात् । ।

आचार्यकमलशीलेन माध्यमिकनयेन विरचिता विस्तृता आर्यवज्रच्छेदिकाटीका परिसमाप्ता । अष्टम्यां शताब्द्यां भारतीयाचार्य मञ्जुश्रीमित्रेण भोत-लोचावा येशे-देमहाभागेन च भोटभाषायामनूदिता । विदुषां वशंवदेन आचार्यपेमातेनजिनमहादयेन भोटभाषातः संस्कृतभाषायां पुनरुद्धृता सर्वसत्त्वहितसुखार्थं इति ।